B.A. Sanskrit
Year – I
Semester – I
Paper - V

# हितोपदेशः - पूर्वार्धः
# Hitopadesa(Purvardha)


Centre for Distance and Online Education

श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya
Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC
Enathur, Kanchipuram 631561.
Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr. G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr. B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey

**Assistants**
S. Vasudevan
S.V. Kalpavalli

**© SCSVMV Deemed University, June 2024**
**All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre**
**Further information on the SCSVMV ODL Programmes may be obtained from**
**Centre for Distance and Online Education (CDOE)**
**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
**Enathur,Kanchipuram-631561.**
**Tamil Nadu, India**
**Phone: 044 – 2726 4301; Mail Id: onlineprograms@kanchiuniv.ac.in ;**

# शुभाभिनन्दनानि

संस्कृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) 'A' श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्त्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor

Sri Chandrasekharendra Saraswati Viswa Mahavidyalaya

Enathur, Kanchipuram

# हितोपदेशः-(पूर्वार्धः)

## पाठ्यपरिचयः

गद्यसाहित्यस्य स्वरूपप्रतिपादने हितोपदेशस्य महनीयता वर्तते। पाठ्येस्मिन् छात्राणां संस्कृतगद्यसाहित्यं प्रति अभिरुचिसम्पादयितुं विशेषोपक्रमः कल्पितः। पाठ्योऽयं हितोपदेशग्रन्थस्य प्रथमभागस्य विषयवस्तुनः अवधेयांशाः वर्तते। ग्रन्थाधारेण मित्रलाभादारभ्य सुहृद्भेदपर्यन्तम् आलोचितांशः पाठ्येऽस्मिन् उपस्थाप्यते। अनेन छात्राणां गद्यसाहित्यं प्रति अभिरुचिः तत्रापि कथितानां मानवीयमूल्यबोधानां ज्ञानं नूनं सम्भवतीति धिया अयं च विषयः शास्त्रीकक्षायां प्रारम्भिकस्थले नियोजितः।

**प्रथमः खण्डः – मङ्गलाचरणम्, कथामुखम्, अस्ति भागिरथीतीरे इत्यारभ्य कर्म न कर्तव्यमिति पर्यन्तम्।**

अस्मिन् खण्डे ग्रन्थस्य आरम्भे ग्रन्थस्य निर्बिघ्नतया परिसमाप्तये मङ्गलाचरणं विहितं वर्तते। ग्रन्थस्यास्य उद्देश्यप्रतिपादनाय ग्रन्थकर्त्रा कथामुखमिति आमुखक्रमेण संस्थाप्य ग्रन्थस्यारम्भः कृतः वर्तते। खण्डेऽस्मिन् काककथाव्याघ्रकथादिविषयाः सन्निवेशिताः यत्र छात्राणां महानुपकारः सम्भवति अस्मात् पाठात्।

**द्वितीयः खण्डः – सुजीर्णमन्तः सुविचक्षणः सुतः इत्यारभ्य कथमेतत्काकः कथयति पर्यन्तम्**

अस्मिन् खण्डे काककथायाः उत्तरभागः वर्णितः यत्र छात्राणाम् अवबोधनात्परं अस्याः कथायाः पूर्णस्वरूपम् आयाति। मूल्यबोधोऽपि कथामाध्यमेन छात्राणां जायते।

**तृतीयः खण्डः – अस्ति भागिरथीतीरे गृध्रकूटनाम्नि पर्वते इत्यारभ्य हिरण्यकोऽवदत् कथयामि श्रूयतामिति पर्यन्तम्।**

अस्मिन् खण्डे वर्णितानां कथानां पठनात्परं छात्राणाम् इदं ज्ञानं भवति यत् अतिथेः हननं न कर्तव्यं तत्रापि यः ज्येष्ठः धर्मज्ञानी सुतरां अतिथेः पूजनं कर्तव्यमेव इति नीतिः प्रतिपादिता। एवमतिथेः माहात्म्यमपि विस्तरेण प्रतिपादितम्। एवं चान्द्रायणव्रतस्यापि माहात्म्यं स्पष्टतया प्रतिपादितम्। एवं दुष्टे विश्वासः न कर्तव्यः इति नीतिरपि तया कथया प्रतिपादितं भवति।

**चतुर्थः खण्डः – अस्ति चम्पकाभिधानायां नगर्याम् इत्यारभ्य कथमेतत् करटको ब्रूते इति पर्यन्तम्**

अस्मिन् खण्डे मित्रलाभे अवशिष्टभागः तथा सुहृद्भेदात् कथाद्वयं च पाठ्यते । तत्र आदौ सन्न्यासिमूषिकयोः कथा भवति । अस्यां कथायां धनं विना जगति कोपि न सहकरोति इति न्यायं बोधयति ग्रन्थकारः । तत्प्रसंगात् कौशम्बीनगरीस्थ-चन्दनदासकथा पाठ्यते । तस्यां कथायां वणिजः पत्नी व्यभिचारी बभूव । सः वृद्धः इति कारणात् तस्याः प्रीतिकरः नासीत् । अतः तं परित्यज्य अन्यं स्वीकरोति ततः कुट्टिन्या जारं परिज्ञाय गुप्तेन दण्डिता । तेन अकस्मात् किमपि करोति चेत् अवश्यं लब्धो भवति इति नीतिः बोधिता । एतादृशाः विविधाः कथाः अस्मिन् खण्डे छात्रैः प्राप्यन्ते।

**पञ्चमः खण्डः –अस्ति वाराणास्यां कर्पूरपटको इत्यारभ्य सुहृदभेदान्तपर्यन्तम्**

अस्मिन् खण्डे सुहृद्भेदस्य प्रसङ्गः भवति । तत्र आदौ श्वानगर्दभकथा भवति । तत्र अन्येषां कार्ये स्वीयवाग्व्यारः न कार्यः इति नीतिः बुध्यते । तथा न क्रियते चेत् गर्दभः यथा रजकेन नष्टः तद्वद् नष्टो भवति इति बोधयति कथा । ततः परं दमनककरटकौ कथं सिंहराजानं पलायितवन्तौ इति संवाद रूपेण पाठः भवति । तत्रैव दमनककरटकयोः संवादोपि प्रतिपादितः नीतिद्योतनाय । ततः परं दुर्दान्तो नाम महाविक्रमः सिम्हः आसीत्, तस्य कथा श्राविता । तत्र स्वामी भृत्यैः निरपेक्षो न कर्तव्यः इति नीतिः अवगन्तव्या । ततः परं घण्टाकर्णस्य कथा भवति । अनेन अस्यपाठस्य परिसमाप्तिः जायते।

| खण्डः | विषयः | पुटसङ्ख्या |
|---|---|---|
| प्रथमः | मङ्गलाचरणम्, कथामुखम्, अस्ति भागिरथीतीरे इत्यारभ्य कर्म न कर्तव्यमिति पर्यन्तम्। | 7-23 |
| द्वितीयः | सुजीर्णमन्तः सुविचक्षणः सुतः इत्यारभ्य कथमेतत्काकः कथयति पर्यन्तम् | 24-35 |
| तृतीयः | अस्ति भागिरथीतीरे गृध्रकूटनाम्नि पर्वते इत्यारभ्य हिरण्यकोऽवदत् कथयामि श्रूयतामिति पर्यन्तम्। | 36-52 |
| चतुर्थः | अस्ति चम्पकाभिधानायां नगर्याम् इत्यारभ्य कथमेतत् करटको ब्रूते इति पर्यन्तम् | 53-89 |
| पञ्चमः | अस्ति वाराणास्यां कर्पूरपटको इत्यारभ्य सुहृद्भेदान्तपर्यन्तम् | 90-136 |

# खण्डः १

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

हितोपदेशः इति ग्रन्थः संस्कृतभाषायां सकलनीतीनां सङ्ग्रहात्मकः तादृशनीतीनां कथारूपेण प्रतिपादकः छात्रोपयोगी ग्रन्थः। अस्मिन्ग्रन्थे नीतयः याः सन्ति ताः महाभारतादि-इतिहासग्रन्थात् तथा माघादिकाव्यात् एवं चाणक्यादिनीत्यादिग्रन्थादपि सङ्गृहीताः सन्ति।हिताय उपदेशः हितोपदेशः, हितोपदेशः विद्यते यत्र तत् हितोपदेशम् इति अस्य नाम्नः विग्रहः। अयं ग्रन्थः चतुर्धा विभिक्तः यथा – मित्रलाभः,सुहृद्भेदः,विग्रहः,सन्धिः चेति। अस्मिन् प्रथमखण्डे मित्रलाभात् काश्चन कथाः बोध्यन्ते। तत्र आदौ ग्रन्थस्य मङ्गलाचरणं ततः विद्यायाः प्रशंसा ततः ग्रन्थस्य कथामुखनामा परिचयो भवति ततः प्रधानकथा विष्णुशर्मसुदर्शनयोः कथा तदनन्तरं विष्णुशर्मोक्तमित्रलाभे विद्यमाना काककपोतादिपक्षिकथा, तत्रैव प्रसङ्गात् पथिकव्याघ्रयोः कथा च पाठ्यते मध्ये मध्ये प्रसङ्गात् नीतयः अपि श्लोकरूपेण बोध्यन्ते इति खण्डस्य अस्य प्रारूपं भवति।

## उद्देश्यम्

- सरलया रीत्या छात्राणां संस्कृतभाषाज्ञानं जायते।
- कथामुखेन नीतयः पाठ्यन्ते।
- विद्यायाः माहात्म्यं ज्ञातुं शक्यते।
- काककथाश्रवणेन कथं साधनाभावेऽपि जीवनं शक्यते इति ज्ञातुं शक्यते।
- व्याघ्रकथाश्रवणेन दुष्टानां सविधे कथं भाव्यमिति ज्ञानं जायते।

## मङ्गलाचरणम्

सिद्धिः साध्ये सताम् अस्तु प्रसादात् तस्य धूर्जटेः ।
जाह्नवी-फेन-लेखेव यन्-मूर्ध्नि शशिनः कला ॥ ।१ ॥

श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु ।
वाचां सर्वत्र वैचित्र्यं नीति-विद्यां ददाति च ॥ ।२ ॥

## विद्या-प्रशंसा

अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ ।३ ॥

सर्व-द्रव्येषु विद्यैव द्रव्यम् आहुः अनुत्तमम् ।
अहार्यत्वाद् अनर्घत्वाद् अक्षयत्वाच्च सर्वदा ॥ ।४ ॥

संयोजयति विद्यैव नीचगापि नरं सरित् ।
समुद्रम् इव दुर्घर्षं नृपं भाग्यम् अतः परम् ॥ ।५ ॥

विद्या ददाति विनयं विनयाद् याति पात्रताम् ।

पात्रत्वात् धनम् आप्नोति धनाद् धर्मं ततः सुखम् ॥ ।६ ॥

विद्या शस्त्रं च शास्त्रं च द्वे विद्ये प्रतिपत्तये ।

आद्या हास्यय वृद्धत्वे द्वितीयाद्रियते सदा ॥ ।७ ॥

यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् ।

कथा-च्छलेन बालानां नीतिस्तद् इह कथ्यते ॥ ।८ ॥

मित्र-लाभः सुहृद्भेदो विग्रहः सन्धिरेव च ।

पञ्च-तन्त्रात् तथान्यस्माद् ग्रन्थाद् आकृष्य लिख्यते ॥ ।९ ॥

**कथामुखम्**

अस्ति भागीरथी-तीरे पाटलिपुत्र-नामधेयं नगरम् । तत्र सर्व-स्वामि-गुणोपेतः सुदर्शनो नाम नरपतिरासीत् । स भूपतिः एकदा केनापि पाठ्यमानं श्लोक-द्वयं शुश्राव-

अनेक-संशयोच्छेदि परोक्षार्थस्य दर्शकम् ।

सर्वस्य लोचनं शास्त्रं यस्य नास्त्ये अन्ध एव सः ॥ ।१० ॥

यौवनं धन-सम्पत्तिः प्रभुत्वम् अविवेकिता ।

एकैकम् अप्यनर्थाय किम् उ यत्र चतुष्टयम् ॥ ।११ ॥

इत्याकर्ण्यात्मनः पुत्राणाम् अनधिगत-शास्त्राणां नित्यम् उन्मार्ग-गामिनां शास्त्राननुष्ठानेनोद्विग्न-मनाः स राजा चिन्तयामास ।

को ऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः ।

काणेन चक्षुषा किं वा चक्षुः पीडैव केवलम् ॥ ।१२ ॥

अजात-मृत-मूर्खाणां वरम् आद्यौ न चान्तिमः ।
सकृद् दुःख-करावाद्यावन्तिमस् तु पदे पदे ॥ ।१३ ॥

किं च-

वरं गर्भ-स्रावो वरम् अपि च नैवाभिगमनं
वरं जातः प्रेतो वरम् अपि च कन्यावजनिता ।
वरं बन्ध्या भार्या वरम् अपि च गर्भेषु वसतिः
न वाविद्वान् रूप-द्रविण-गुण-युक्तो ऽपि तनयः ॥ ।१४ ॥

स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥ ।१५ ॥

अन्यच्च-

गुणिगणगणनाऽरम्भे
न पतति कठिनी स-सम्भ्रमाद् यस्य ।
तेनाम्बा यदि सुतिनी
वद बन्ध्या कीदृशी भवति ? ॥ ।१६ ॥

अपि च-

दाने तपसि शौर्ये च यस्य न प्रथितं मनः ।
विद्यायाम् अर्थ-लाभे च मातुः उच्चार एव सः ॥ ।१७ ॥

अपरं च-

वरम् एको गुणी पुत्रो न च मूर्ख-शतैः अपि ।
एकश्चन्द्रमस्तमो हन्ति न च तारा-गणैः अपि ॥ ।१८ ॥

पुण्य-तीर्थे कृतं येन तपः क्वाप्यतिदुष्करम् ।

तस्य पुत्रो भवेद् वश्यः समृद्धो धार्मिकः सुधीः ॥ ।१९ ॥

तथा चोक्तं-

अर्थागमो नित्यम् अरोगिता च प्रिया च भार्या प्रिय-वादिनी च ।

वश्यश्च पुत्रो ऽर्थ-करी च विद्या षड् जीव-लोकस्य सुखानि राजन् ॥ ।२० ॥

को धन्यो बहुभिः पुत्रैः कुशूलापूरणाढकैः ।

वरम् एकः कुलालम्बी यत्र विश्रूयते पिता ॥ ।२१ ॥

ऋण-कर्ता पिता शत्रुः माता च व्यभिचारिणी ।

भार्या रूपवती शत्रुः पुत्रः शत्रुः अपण्डितः ॥ ।२२ ॥

यस्य कस्य प्रसूतो ऽपि गुणवान् पूज्यते नरः ।

धनुः वंश-विशुद्धो ऽपि निर्गुणः किं करिष्यति ॥ ।२३ ॥

हा हा पुत्रक नाधीतं गतास्व् एतासु रात्रिषु ।

तेन त्वं विदुषां मध्ये पङ्के गौः इव सीदसि ॥ ।२४ ॥

तत् कथम् इदानीम् एते मम पुत्रा गुणवन्तः क्रियन्ताम् ? यतः-

आहार-निद्रा-भय-मैथुनानि सामान्यम् एतत् पशुभिः नराणाम् ।

ज्ञानं नराणाम् अधिको विशेषो ज्ञानेन हीनाः पशुभिः समानाः ॥ ।२५ ॥

यतः-

धर्मार्थ-काम-मोक्षाणां यस्यैकोऽपि न विद्यते ।

अजागल-स्तनस्येव तस्य जन्म निरर्थकम् ॥ ।२६ ॥

यच्चोच्यते-

आयुः कर्म च वित्तं च विद्या निधनम् एव च ।

पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥ ।२७ ॥

किं च-

अवश्यं भाविनो भावा भवन्ति महताम् अपि ।

नग्नत्वं नीलकण्ठस्य महाहि-शयनं हरेः ॥ ।२८ ॥

अन्यच्च-

यद् अभावि न तद् भावि भावि चेन्न तद् अन्यथा ।

इति चिन्ताविषघ्नोऽयम् अगदः किं न पीयते ॥ ।२९ ॥

एतत् कार्याक्षमाणां केषाञ्चिद् आलस्यवचनम् । पुरुषकारौत्कार्ष्यम् आह-

यथा ह्य् एकेन चक्रेण न रथस्य गतिः भवेत् ।

तथा पुरुषकारेण विना दैवं न सिद्ध्यति ॥ ।३० ॥

तथा च-

पूर्वजन्मकृतं कर्म तद् दैवम् इति कथ्यते ।

तस्मात् पुरुषकारेण यत्नं कुर्याद् अतन्द्रितः ॥ ।३१ ॥

न दैवम् अपि सञ्चिन्त्य त्यजेद् उद्योगम् आत्मनः ।

अनुद्योगेन तैलानि तिलेभ्यो नाप्तुम् अर्हति ॥ ।३२ ॥

अन्यच्च-

उद्योगिनं पुरुष-सिंहम् उपैति लक्ष्मीः

दैवेन देयम् इति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषम् आत्म-शक्त्या
यत्ने कृते यदि न सिध्यति को ऽत्र दोषः ॥ ।३३ ॥

यथा मृत्-पिण्डतः कर्ता कुरुते यद् यद् इच्छति ।
एवम् आत्म-कृतं कर्म मानवः प्रतिपद्यते ॥ ।३४ ॥

काकतालीयवत् प्राप्तं दृष्ट्वापि निधिम् अग्रतः ।
न स्वयं दैवम् आदत्ते पुरुषार्थम् अपेक्षते ॥ ।

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ ।३६ ॥

मातृपितृकृताभ्यासो गुणितामेति बालकः ।
न गर्भच्युतिमात्रेण पुत्रो भवति पण्डितः ॥

तथा चोक्तं-
माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभा-मध्ये हंस-मध्ये बको यथा ॥ ।३७ ॥

रूप-यौवन-सम्पन्ना विशाल-कुल-सम्भवाः ।
विद्या-हीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ।३८ ॥

मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः ।
तावच्च शोभते मूर्खो यावत्किञ्चिन्न भाषते ॥

अपरं च-

पुस्तकेषु च नाधीतं नाधीतं गुरु-सन्निधौ ।
न शोभते सम्भा-मध्ये जार-गर्भ इव स्त्रियाः ॥ ।३९ ॥

एतच्चिन्तयित्वा राजा पण्डित-सभां कारितवान् । राजोवाच-भो भोः पण्डिताः ! श्रूयतां मम वचनम् । अस्ति कश्चिद् एवम्भूतो विद्वान् यो मम पुत्राणां नित्यम् उन्मार्ग-गामिनाम् अनधिगत-शास्त्राणाम् इदानीं नीति-शास्त्रोपदेशेन पुनः जन्म कारयितुं समर्थः ? यतः-

काचः काञ्चन-संसर्गाद् धत्ते मारकतीः द्युतीः ।
तथा सत्-सन्निधानेन मूर्खो याति प्रवीणताम् ॥ ।४० ॥

उक्तं च-
हीयते हि मतिस् तात हीनैः सह समागमात् ।
समैश्च समताम् एति विशिष्टैश्च विशिष्टताम् ॥ ।४१ ॥

अत्रान्तरे विष्णु-शर्म-नामा महा-पण्डितः सकल-नीइति-शास्त्र-तत्त्व-ज्ञो बृहस्पतिः इवाब्रवीत्-देव महाकुल-सम्भूता एते राजपुत्राः । तत् मया नीतिं ग्राहयितुं शक्यन्ते । यतः-

नाद्रव्ये निहिता काचित् क्रिया फलवती भवेत् ।
न व्यापार-शतेनापि शुकवत् पाठ्यते बकः ॥ ।४२ ॥

अन्यच्च-

अस्मिंस्तु निर्गुणं गोत्रे नापत्यम् उपजायते ।
आकरे पद्म-रागानां जन्म काच-मणेः कुतः ॥ ।४३ ॥

अतोऽहं षण्-मासाभ्यन्तरे भवत्-पुत्रान् नीति-शास्त्राभिज्ञान् करिष्यामि । राजा स-विनयं पुनः उवाच ।

कीटो ऽपि सुमनः-सङ्गाद् आरोहति सतां शिरः ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥ ।४४ ॥

अन्यच्च-
यथोदय-गिरेः द्रव्यं सन्निकर्षेण दीप्यते ।
तथा सत्-सन्निधानेन हीन-वर्णो ऽपि दीप्यते ॥ ।४५ ॥

गुणा गुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः ।
आस्वाद्य-तोयाः प्रवहन्ति नद्यः
समुद्रम् आसाद्य भवन्त्य् उपेयाः ॥ ।४६ ॥

तद् एतेषाम् अस्मत्-पुत्राणां नीति-शास्त्रोपदेशाय भवन्तः प्रमाणम् इत्युक्त्वातस्य विष्णु-शर्मणो करे बहुमान-पुरःसरं पुत्रान् समर्पितवान् ॥

# १-०२ प्रस्तावना कथा

## मित्र-लाभः

अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात् प्रस्ताव-क्रमेण पण्डितो ऽब्रवीत्-भो राज-पुत्राः शृणुत-

काव्य-शास्त्र-विनोदेन कालो गच्छति धीमताम् ।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥ ।१ ॥

तद् भवतां विनोदाय काक-कूर्मादीनां विचित्रां कथां कथयिष्यामि । राज-पुत्रैः उक्तम्-आर्य ! कथ्यतां । विष्णु-शर्मोवाच-शृणुत यूयम् । सम्प्रति मित्र-लाभः प्रस्तूयते । यस्यायम् आद्यः श्लोकः-

असाधना वित्त-हीना बुद्धिमन्तः सुहृन्-मताः ।
साधयन्त्य् आशु कार्याणि काक-कूर्म-मृगाखुवत् ॥ ।२ ॥

राजपुत्रा ऊचुः-कथम् एतत् ?

# १-०३ कपोतकथा

सोऽब्रवीत्- अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र नानादिग्-देशाद् आगत्य रात्रौ पक्षिणो निवसन्ति । अथ कदाचिद् अवसन्नायां रात्रौ अस्ताचल-चूडावलम्बिनि भगवति कुमुदिनी-नायके चन्द्रमसि । लघुपतन-नामा वायसः प्रबुद्धः कृतान्तम् इव द्वितीयम् अटन्तं पाश-हस्तं व्याघम् अपश्यत् । तम् आलोक्याचिन्तयत्-अद्य प्रातः एवानिष्ट-दर्शनं जातम् । न जाने किम् अनभिमतं दर्शयिष्यति । इत्युक्त्वातद् अनुसरण-क्रमेण व्याकुलश्चलति । यतः-

शोक-स्थान-सहस्राणि भय-स्थान-शतानि च ।
दिवसे दिवसे मूढम् आविशन्ति न पण्डितम् ॥ ।३ ॥

अन्यच्च-विषयिणाम् इदम् अवश्यं कर्तव्यम् ।
उत्थायोत्थाय बोद्धव्यं किम् अद्य सुकृतं कृतम् ।
आयुषः खण्डम् आदाय रविः अस्तं गमिष्यति ॥ ।४ ॥

अथ तेन व्याधेन तण्डुल-कणान् विकीर्य जालं विस्तीर्णम् । स च तत्र प्रच्छन्नो भूत्वा स्थितः । अस्मिन्न् एव काले चित्रग्रीव-नामा कपोत-राजः स-परिवारो वियति विसर्पंस्तण्डुल-कणान् अवलोकयामास । ततः कपोत-राजस्तण्डुल-कण-लुब्धान् कपोतान् प्राह-कुतो ऽत्र निर्जने वने तण्डुल-कणानां सम्भवः । तन् निरूप्यतां तावत् । भद्रम् इदं न पश्यामि प्रायेणानेन तण्डुल-कण-लोभेनास्माभिः अपि तथा भवितव्यम् ।

कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे ।
वृद्धव्याघ्रेण सम्प्राप्तः पथिकः सम्मृतः ॥ ।५ ॥

कपोता ऊचुः- कथम् एतत् ?

अहम् एकदा दक्षिणारण्ये चरन्न् अपश्यम् एको वृद्धो व्याघ्रः स्नातः कुश-हस्तः सरस्तीरे ब्रूते- भो भो पन्थाः ! इदं सुवर्णकङ्कणं गृह्यताम् । ततो लोभाकृष्टेन केनचित् पान्थेन आलोचितम्-भाग्येन एतत् सम्भवति । किन्तु अस्मिन् आत्म-सन्देहे प्रवृत्तिः न विधेया । यतः-

अनिष्टाद् इष्ट-लाभेऽपि न गतिः जायते शुभा ।
यत्रास्ते विष-संसर्गो ऽमृतं तद् अपि मृत्यवे ॥ ।६ ॥

किन्तु सर्वत्रार्थार्जन-प्रवृत्तौ सन्देह एव । तथा चोक्तम्-

न संशयम् अनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनः आरुह्य यदि जीवति पश्यति ॥ ।७ ॥

तन् निरूपयामि तावत् । प्रकाशं ब्रूते । कुत्र तव कङ्कणम् ? व्याघ्रो हस्तं प्रसार्य दर्शयति । पान्थो ऽवदत्-कथं मारात्मके त्वयि विश्वासः ?

व्याघ्र उवाच- श्रृणु रे पान्थ ! प्राग् एव यौवन-दशायाम् अहम् अतीव दुर्वृत्त आसम् । अनेक-गोमानुषाणां वधाद् मे पुत्रा मृता दाराश्च । वंश-हीनश्चाहम् । ततः केनचिद् धार्मिकेणाहम् उपदिष्टः । दान-धर्मादिकं चरतु भवान् इति । तद्-उपदेशादि-दानीम् अहं स्नानशीलो दाता वृद्धो गलित-नख-दन्तः न कथं विश्वास-भूमिः ? उक्तं च-

इज्याऽध्ययन-दानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्ट-विधः स्मृतः ॥ ।८ ॥

तत्र पूर्वश्चतुर्वर्गो दम्भार्थम् अपि सेव्यते ।
उत्तरस् तु चतुर्वर्गो महात्मन्य् एव तिष्ठति ॥ ।९ ॥

मम चैतावान् लोभविरहः । येन स्व-हस्त-स्थम् अपि सुवर्ण-कङ्कणं यस्मै कस्मैचिद् दातुम् इच्छामि तथापि व्याघ्रो मानुषं खादतीति लोकापवादो दुर्निवारः । यतः-

गतानुगतिको लोकः कुट्टनीम् उपदेशिनीम् ।
प्रमाणयति नो धर्मे यथा गोघ्नम् अपि द्विजम् ॥ ।१० ॥

मया च धर्मशास्त्राणि अधीतानि । श्रृणु-

मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा ।
दरिद्रे दीयते दानं सफलं पाण्डुनन्दन ॥ ।११ ॥

प्राणा यथात्मनो ऽभीष्टा भूतानाम् अपि ते तथा ।
आत्मौपम्येन भूतानां दयां कुर्वन्ति साधवः ॥ ।१२ ॥

अपरं च-

प्रत्याख्याने च दाने च सुख-दुःखे प्रियाप्रिये ।
आत्मौपम्येन पुरुषः प्रमाणम् अधिगच्छति ॥ ।१३ ॥

अन्यच्च-

मातृवत् परदारेषु परद्रव्येषु लोष्ट्रवत् ।
आत्मवत् सर्व-भूतेषु यः पश्यति स पण्डितः ॥ ।१४ ॥

त्वं च अतीवदुर्गतः । तेन तत् तुभ्यं दातुं सयत्नोऽहम् । तथा चोक्तम्-

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्य किम् औषधैः ॥ ।१५ ॥

अन्यच्च-

दातव्यम् इति यद् दानं दीयतेऽनुपकारिणि ।
देशे काले च पात्रे च तद् दानं सात्त्विकं विदुः ॥ ।१६ ॥

तद् अत्र सरसि स्नात्वा सुवर्ण-कङ्कणम् इदं गृहाण । ततो यावद् असौ तद्-वचः-प्रतीतो लोभात् सरः स्नातुं प्रविष्टः, तावन् महा-पङ्के निमग्नः पलायितुम् अक्षमः । तं पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत्-अहह महा-पङ्के पतितो ऽसि । अतस्त्वाम् अहम् उत्थापयामि । इत्युक्त्वा शनैः शनैः उपगम्य तेन व्याघ्रेण धृतः स पान्थो ऽचिन्तयत्-

न धर्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः ।

स्वभाव एवात्र तथातिरिच्यते

यथा प्रकृत्या मधुरं गवां पयः ॥ ।१७ ॥

किं च-

अवशेन्द्रिय-चित्तानां हस्ति-स्नानम् इव क्रिया ।

दुर्भगाभरण-प्रायो ज्ञानं भारः क्रियां विना ॥ ।१८ ॥

तन्मया भद्रं न कृतम् । यदत्र मारात्मके विश्वासः कृतः । तथा चोक्तम्-

नदीनां शस्त्र-पाणीनां नखिनां शृङ्गिणां तथा ।

विश्वासो नैव कर्तव्यः स्त्रीषु राज-कुलेषु च ॥ ।१९ ॥

अपरं च-

सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः ।

अतीत्य हि गुणान् सर्वान् स्वभावो मूर्ध्नि वर्तते ॥ ।२० ॥

अन्यच्च-

स हि गगन-विहारी कल्मष-ध्वंस-कारी

दश-शत-कर-धारी ज्योतिषां मध्य-चारी ।

विधुः अपि विधि-योगाद् ग्रस्यते राहुणासौ

लिखितम् अपि ललाटे प्रोज्झितं कः समर्थः ॥ ।२१ ॥

इति चिन्तयन्नेवासौ व्याघ्रेण धृत्वा व्यापादितः खादितश्च ।

अतोऽहं ब्रवीमि- कङ्कणस्य तु लोभेनेत्यादि ।

## सारांशः

हितोपदेशमिति ग्रन्थः सकलनीतिशास्त्रज्ञेन विःष्णुशर्मनामकपण्डितेन कथितः सुभाषितसङ्ग्रहात्मको ग्रन्थः नारायणपण्डितेन संगृहीतः भवति। अस्य ग्रन्थस्य वैशिष्ट्यमिदस्ति यत् कथारूपेण नीतिबोधनमिति। कथाप्रसंगः तावत् एवम् भवति- गंगातटे पाटलीपुत्रनामके नगरे सुदर्शनो नाम राजा आसीत् । सः कदाचित् श्लोकद्वयम् अश्रौषीत्। श्लोकद्वयस्य तात्पर्यं तावत् एवम् भवति – यः सकलसंन्देहनिवारकम् अदृश्यवस्तुदर्शकं, सर्वेषां नेत्रभूतं शास्त्रं न जानाति स एव अन्धः। युवत्वं, धनं, प्रभुत्वं, मूर्खत्वं एतच्चतुष्टयं प्रत्येकमपि नाशकरं भवति । सर्वं एकत्र भवति चेत् सुतरां नष्टः एव भवति इति। एतच्छ्रुत्वा स्वस्य पुत्राणां मूर्खाणां विषये चिन्ता गता। तेषां शास्त्रं बोधयितुं विष्णुशर्मनामानं पण्डितमाहूतवान् षण्मासाभ्यन्तरे शास्त्रज्ञानं संपादयामि तेषामिति विष्णुशर्मापि प्रतिज्ञाय तान् पुत्रान् आहूय हितापदेशं चतुर्धाविभक्तं उपदिष्टवान्। हितोपदेशग्रन्थे भागचतुष्टयं विद्यते। मित्रलाभः,सुहृद्भेदः,विग्रहः सन्धिश्चेति।

अस्मिन् ग्रन्थे आदौ शिवनमस्कारात्मकः मङ्गलश्लोकः विद्यते। अनन्तरम् अस्य ग्रन्थस्य अनुबन्धचतुष्टयं प्रतिपादितम्। ततः परं विद्यायाः माहात्म्यं विस्तरेन प्रतिपादितं। ततःपरं कथामुखं। ततः परः मित्रलाभारम्भः।

अस्मिन् खण्डे मित्रलाभस्थाः, काक-कपोतादिकथा, तथा पथिकव्याघ्रकथाः विद्यन्ते।

तत्र आद्यकथा-

गोदावरीतीरे विशालः शाल्मलीवृक्षः एकः आसीत्। तत्र अनेके पक्षिणः निवसन्ति स्म। कदाचित् निशायाः अन्तिमे यामे अरुणोदयपूर्वकाले लघुपतननामा कश्चित् काकः तत्र असीत्। सः प्रातरेव प्रथमतः व्याधं दृष्ट्वा अद्य मरणं निश्चयीकृत्य ततः निस्ससार। ततः परं व्याधः तान् पक्षिणः अपहरणाय जालं स्थापितवान्। तस्मिन् समये आकाशे कपोतपक्षिणः अटन्ति स्म। तेषां राजा भवति चित्रग्रीवः। सः स्वबान्धवान् उपदिदेश -हे कपोताः सावदनेन तिष्ठन्तु मा भुञ्जीथाः तण्डुलकणान्। तत्र किमपि सूक्ष्मम् अस्ति। अतः विचार्यैव कार्यं कर्तव्यम्। अन्यथा पथिकवत् नष्टो भवामः इति।

द्वितीयकथा-

इयं कथा प्रथमकथायाः एव अवान्तरकथा चित्रवर्णोपदेशरूपा भवति तथाहि –मया कदाचित् अरण्ये प्रयाणसमये वृद्धव्याघ्रः दृष्टः। सः चलितुमसमर्थः आसीत्। अतः भोजनाय कपटतन्त्रेण मार्गे ये आयन्ति तेषां सविधे स्वर्णकङ्कणं प्रदर्शय स्वीकुर्वन्तु इति अवादीत्। परन्तु सर्वे पथिकाः तस्य घोरबुद्धिं ज्ञात्वा ततः निर्गताः। कदाचित् कश्चित् पथिकः तादृशकङ्कणं त्यक्तुं अमनसः तं व्याघ्रमुपसृत्य पृष्टवान् मह्यं ददातु स्वर्णकङ्कणं इति।परन्तु तस्य मनसि सन्देहोपि आसीत् व्याघ्रः मां भक्षयतीति। तदानीं व्याघ्रः अवदत् मा भैषीः। अहं बाल्ये बहुपापं अनुष्ठितवान् अतः सर्वे मम बान्धवाः गताः। अतः इदानीं पापापनोदनाय सर्वमिदं कुर्वन् अस्मि इति कपटनाटकमाचरितं वृद्धव्याघ्रेण। अनन्तरं व्याघ्रः तं पथिकम् उवाच भवान् अत्र सरोवरे स्नात्वा कङ्कणं स्वीकुर्वन्तु इति। तच्छ्रुत्वा लोभात् अविचार्य झटिति तत्र गतः पङ्के पतितः। ततः परं सः व्याघ्रः तं खादितवान्। अतः अविचार्य किमपि कार्यं न कर्तव्यमिति चित्रग्रीवः उपदिदेश ।।

## बोधप्रश्नाः

1. धूर्जटिः कः?
2. विद्या किं ददाति?
3. द्वे विद्ये के प्रतिपत्तव्ये?
4. गवां पयसः प्रकृतिः का?
5. सुवर्णकङ्कणं केन दत्तम्?

## शब्दावली

1. धूर्जटिः
2. विद्या

3. मित्रलाभः
4. सुदर्शनः
5. विष्णुशर्मा
6. पाटलीपुत्रम्
7. पथिकः

**सन्दर्भग्रन्थः -**

1. हितोपदेशम् – मूलमात्रम्, श्रीलक्ष्मीनारायणमुद्रालयः, बंबई- 1918.

**सहायकग्रन्थाः –**

1. हितोपदेशम् – Commentary by - पण्डित रामेश्वरभट्ट, निर्णयसागरप्रेस्, बंबाई-1941.
2. हितोपदेशम्- Commentary by M.R.Kale, Motilal Banarsi Das,Varanasi,1976.

**बोधप्रश्नोत्तराणि –**

1. शिवः
2. विनयम्
3. शास्त्रविद्या, शास्त्रविद्या
4. प्रकृत्या मधुरं गवां पयः
5. व्याघ्रेन

**अभ्यासप्रश्नाः**

1. अस्मिन् खण्डे कथिताः सर्वे श्लोकाः कण्ठस्थिकर्तव्याः
2. कथानां लघुपरिचयं कुरुत
3. श्लोकस्थान् धातून् चित्वा शतवाक्यानि लिखत

# खण्डः २

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

हितोपदेशः इति ग्रन्थः संस्कृतभाषायां सकलनीतीनां सङ्ग्रहात्मकः तादृशनीतीनां कथारूपेण प्रतिपादकः छात्रोपयोगी ग्रन्थः। अस्मिन्ग्रन्थे नीतयः याः सन्ति ताः महाभारतादि-इतिहासग्रन्थात् तथा माघादिकाव्यात् एवं चाणक्यादिनीत्यादिग्रन्थादपि सङ्गृहीताः सन्ति। अस्मिन्खण्डे कपोतकथायाः एव अवशिष्टभागः अस्मिन्खण्डे प्रतिपाद्यते। ते पक्षिणः व्याधाद्भीताः सन्तोऽपि लोभवशात् तण्डुलकणान् आहर्तुं अधःपतिताः व्याधेन लब्धाः। तेषां दीनस्वरं श्रुत्वा चित्रग्रीवः तान् निन्दितवान् । ततः तेन हिरणयकनाम्नः मण्डूकराज्ञः कथां श्रावितवान् तन्मध्ये एव हिरण्यकेन दुष्टश्रृगालस्यापि कथा श्राविता इति अस्य खण्डस्य स्वरूपं भवति।

उद्देश्यम्

- ज्येष्ठानां वाक्यं सर्वदा श्रोतव्यमिति ज्ञानं भवति।
- लोभः पापजनकः इति बोधनात् लोभात् निवृत्तिः कार्या इति ज्ञानमागच्छति।
- बन्धुजनानामावश्यकता ज्ञायते।
- विपत्काले जागरूपेण भाव्यमिति ज्ञानं भवति।
- सरलया रीत्या छात्राणां संस्कृतभाषाज्ञानं जायते।

अत एव सर्वथाऽविचारितं कर्म न कर्तव्यम् इति ।

यतः-

सुजीर्णम् अन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य यत् कृतं
सुदीर्घकालेऽपि न याति विक्रियाम् ॥ ।२२ ॥

एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पम् आह- आः ! किम् एवम् उच्यते ?

वृद्धस्य वचनं ग्राह्यम् आपत्काले ह्युपस्थिते ।
सर्वत्रैवं विचारे च भोजनेऽपि प्रवर्तताम् ॥ ।२३ ॥

यतः-

शङ्काभिः सर्वम् आक्रान्तम् अन्नं पानं च भूतले ।
प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथं न वा ? ॥ ।२४ ॥

यथा चोक्तम्-

ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनो नित्य-शङ्कितः ।
परभाग्योपजीवी च षड् एते नित्यदुःखिताः ॥ ।२५ ॥

एतच्छ्रुत्वा तण्डुलकणलोभेन नभोमण्डलाद् अवतीर्य सर्वे कपोतास्तत्रोपविष्टाः । यतः-

सुमहान्त्यपि शास्त्राणि धारयन्तो बहु-श्रुताः ।
छेत्ताः संयानां च क्लिश्यन्ते लोभमोहिताः ॥ ।२६ ॥

अन्यच्च-

लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते ।
लोभान् मोहश्च नाशश्च लोभः पापस्य कारणम् ॥ ।२७ ॥

अन्यच्च-

असम्भवं हेममृगस्य जन्म
तथापि रामो लुलुभे मृगाय ।
प्रायः समापन्न-विपत्ति-काले
धियोऽपि पुंसां मलिना भवन्ति ॥ ।२८ ॥

अनन्तरं ते सर्वे जालनिबद्धा बभूवुः, ततो यस्य वचनात् तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति स्म । यतः,

न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलम् ।
यदि कार्य-विपत्तिः स्यान् मुखरस्तत्र हन्यते ॥ ।२९ ॥

तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच-नायम् अस्य दोषः, यतः

आपदाम् आपतन्तीनां हितो ऽप्यायाति हेतुताम् ।
मातृजङ्घा हि वत्सस्य स्तम्भी-भवति बन्धने ॥ ।३० ॥

अन्यच्च-

स बन्धुः यो विपन्नानाम् आपद्-उद्धरण-क्षमः ।
न तु भीत-परित्राण-वस्तूपालम्भ-पण्डितः ॥ ।३१ ॥

विपत्काले विस्मय एव कापुरुषलक्षणम् । तदत्र धैर्यम् अवलम्ब्य प्रतीकारश्चिन्त्यताम्, यतः-

विपदि धैर्यम् अथाभ्युदये क्षमा
सदसि वाक्यपटुता युधि विक्रमः ।
यशसि चाभिरुचिः व्यसनं श्रुतौ
प्रकृति-सिद्धम् इदं हि महात्मनाम् ॥ ।३२ ॥

सम्पदि यस्य न हर्षो विपदि विषादो रणे च भीरुत्वम् ।
तं भुवन-त्रय-तिलकं जनयति जननी सुतं विरलम् ॥ ।३३ ॥

अन्यच्च-

षड्-दोषाः पुरुषेणेह हातव्या भूतिम् इच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घ-सूत्रता ॥ ।३४ ॥

इदानीम् अपि एवं क्रियताम्- सर्वैः एकचित्तीभूय जालम् आदाय उड्डीयताम् । यतः-

अल्पानाम् अपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैः गुणत्वम् आपन्नैः बध्यन्ते मत्त-दन्तिनः ॥ ।३५ ॥

संहतिः श्रेयसी पुंसां स्वकुलैः अल्पकैः अपि ।
तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥ ।३६ ॥

इति विचित्य पक्षिणः सर्वे जालम् आदाय उत्पतिताः । अनन्तरं च व्याधः सुदूराज्जालापहारकांस्तान् अवलोक्य पश्चाद् धावितोऽचिन्तयत्-

संहतास्तु हरन्त्येते मम जालं विहङ्गमाः ।
यदा तु निपतिष्यन्ति वशम् एष्यन्ति मे तदा ॥ ।३७ ॥

ततस्तेषु चक्षुः विषयम् अतिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः ।

अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचुः- स्वामिन् ! किम् इदानीं कर्तुम् उचितम् ?

चित्रग्रीव उवाच-

माता मित्रं पिता चेति स्वभावात् त्रितयं हितम् ।

कार्य-कारणतश्चान्ये भवन्ति हित-बुद्धयः ॥ ।३८ ॥

तन्मे मित्रं हिरण्यको नाम मूषिकराजा गण्डकीतीरे चित्रवने निवसति । सोऽस्माकं पाशांश्छेत्स्यति इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः । हिरण्यकश्च सर्वदा अपायशङ्कया शतद्वारं विवरं कृत्वा निवसति । ततो हिरण्यकः कपोतावपात- भयाच्चकितः तूष्णीं स्थितः । चित्रग्रीव उवाच- सखे हिरण्यक! कथम् अस्मान्न सम्भाषसे ?

ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससम्भ्रमं बहिः निःसृत्य अब्रवीत्- आः ! पुण्यवान् अस्मि प्रिय-सुहृन्मे चित्रग्रीवः समायातः ।

यस्य मित्रेण सम्भाषो यस्य मित्रेण संस्थितिः ।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान् ॥ ।३९ ॥

अथ पाशबद्धांश्चैतान् दृष्ट्वा सविस्मयः क्षणं स्थित्वा उवाच- सखे ! किम् एतत् ?

चित्रग्रीव उवाच- सखे ! अस्माकं प्राक्तन-जन्म-कर्मणः फलम् एतत् ।

यस्माच्च येन च यथा च यदा च यच्च
यावच्च यत्र च शुभाशुभम् आत्म-कर्म ।
तस्माच्च तेन च तथा च तदा च तच्च
तावच्च तत्र च विधातृ-वशाद् उपैति ॥ ।४० ॥

राग-शोक-परीताप-बन्धन-व्यसनानि च ।

आत्मापराध-वृक्षाणां फलान्येतानि देहिनाम् ॥ ।४१ ॥

एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरम् उपसर्पति । तत्र चित्रग्रीव उवाच-मित्र ! मा मैवं कुरु । प्रथमम् अस्मद्-आश्रितानाम् एतेषां तावत् पाशांश् छिन्धि । मम पाशं पश्चाच् छेत्स्यसि ।

हिरण्यकोऽप्याह- अहम् अल्प-शक्तिः । दन्ताश्च मे कोमलाः । तद् एतेषां पाशांश् छेत्तुं कथं समर्थो भवामि ? तत् यावन्मे दन्ता न त्रुट्यन्ति, तावत् तव पाशं छिनद्मि । तदनन्तरम् अप्येतेषां बन्धनं यावत् शक्यं छेत्स्यामि ।

चित्रग्रीव उवाच- अस्त्वेवम् । तथापि यथा-शक्ति बन्धनम् एतेषां खण्डय ।

हिरण्यकेनोक्तम्- आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिवेदिनां सम्मतम् ।

यतः-

आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैः अपि ।
आत्मानं सततं रक्षेद्दारैः अपि धनैः अपि ॥ ।४२ ॥

अन्यच्च–

धर्मार्थ-काम-मोक्षाणां प्राणाः संस्थित-हेतवः ।
तान् निघ्नता किं न हतं रक्षता किं न रक्षितम् ॥ ।४३ ॥

चित्रग्रीव उवाच- सखे ! नीतिस्तावद् ईदृश्येव, किन्त्वहम् अस्मदाश्रितानां दुःखं सोढुं सर्वथासमर्थस्तेनेदं ब्रवीमि । यतः-

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ ।४४ ॥

अयम् अपरश्चासाधारणो हेतुः ।

जाति-द्रव्य-बलानां च साम्यम् एषां मया सह ।
मत्-प्रभुत्व-फलं ब्रूहि कदा किं तद् भविष्यति ॥ ।४५ ॥

अन्यच्च-

विना वर्तनम् एवैते न त्यजन्ति ममान्तिकम् ।
तन्मे प्राणव्ययेनापि जीवयैतान् ममाश्रितान् ॥ ।४६ ॥

किं च-

मांसमूत्रपुरीषास्थिपूरितेऽत्र कलेवरे ।
विनश्वरे विहायास्थां यशः पालय मित्र मे ॥ ।४७ ॥

अपरं च पश्य-

यदि नित्यम् अनित्येन निर्मलं मलवाहिना ।
यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम् ॥ ।४८ ॥

यतः-

शरीरस्य गुणानां च दूरम् अत्यन्तम् अन्तरम् ।
शरीरं क्षण-विध्वंसि कल्पान्त-स्थायिनो गुणाः ॥ ।४९ ॥

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन् अब्रवीत्- साधु मित्र ! साधु । अनेनाश्रित-वात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते । एवम् उक्त्वा तेन सर्वेषां कपोतानां बन्धनानि छिन्नानि । ततो हिरण्यकः सर्वान् सादरं सम्पूज्य आह-सखे चित्रग्रीव ! सर्वथात्र जालबन्धनविधौ सति दोषम् आशङ्क्य आत्मनि अवज्ञा न कर्तव्या ।

यतः-

योऽधिकाद् योजनशतान् पश्यतीहामिषं खगः ।
स एव प्राप्तकालस्तु पाशबन्धं न पश्यति ॥ ।५० ॥

अपरं च-

शशिदिवाकरयोः ग्रहपीडनं
गजभुजङ्गमयोः अपि बन्धनम् ।
मतिमतां च विलोक्य दरिद्रतां
विधिः अहो बलवान् इति मे मतिः ॥ ।५१ ॥

अन्यच्च-

व्योमैकान्त-विहारिणोऽपि विहगाः सम्प्राप्नुवन्त्यापदं
बध्यन्ते निपुणैः अगाध-सलिलान् मत्स्याः समुद्रादपि ।
दुर्नीतं किम् इहास्ति किं सुचरितं कः स्थान-लाभे गुणः
कालो हि व्यसन-प्रसारित-करो गृह्णाति दूरादपि ॥ ।५२ ॥

इति प्रबोध्य आतिथ्यं कृत्वा आलिङ्ग्य च तेन सम्प्रेषितश् चित्रग्रीवो ऽपि सपरिवारो यथेष्ट-देशान् ययौ, हिरण्यको ऽपि स्वविवरं प्रविष्टः ।

यानि कानि च मित्राणि कर्तव्यानि शतानि च ।
पश्य मूषिकमित्रेण कपोता मुक्त-बन्धनाः ॥ ।५३ ॥

अथ लघु-पतनक-नामा काकः सर्ववृत्तान्तदर्शी साश्चर्यम् इदम् आह- अहो हिरण्यक ! श्लाघ्यो ऽसि, अतोऽहम् अपि त्वया सह मैत्रीं कर्तुम् इच्छामि । अतस्त्वं मां मैत्र्येणानुग्रहीतुम् अर्हसि ।

एतच्छ्रुत्वा हिरण्यकोऽपि विवराभ्यन्तरादाह- कस्त्वम् ?

स ब्रूते- लघुपतनकनामा वायसोऽहम् । हिरण्यको विहस्याह- का त्वया सह मैत्री ?

यतः-

यद्येन युज्यते लोके बुधस्तत्तेन योजयेत् ।
अहम् अन्नं भवान् भोक्ता कथं प्रीतिः भविष्यति ॥ ।५४ ॥

अपरं च-

भक्ष्यभक्षयोः प्रीतिः विपत्तेः कारणं मतम् ।
श्टगालात् पाशबद्धोऽसौ मृगः काकेन रक्षितः ॥ ।५५ ॥

वायसोऽब्रवीत्– कथम् एतत् ?

हिरण्यकः कथयति-

## ०१-०२ दुष्टशृगालः

अस्ति मगधदेशे चम्पकवती नाम अरण्यानी । तस्यां चिरात् महता स्नेहेन मृग-काकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन् हृष्ट-पुष्टाङ्गः केनचित् शृगालेनावलोकितः । तं दृष्ट्वा शृगालोऽचिन्तयत्- आः ! कथम् एतन्मांसं सुललितं भक्षयामि ? भवतु, विश्वासं तावद् उत्पादयामि इत्यालोच्य उपसृत्याब्रवीत्-मित्र ! कुशलं ते ?

मृगेणोक्तम्- कस्त्वम् ?

स ब्रूते- क्षुद्रबुद्धिनामा जम्बुकोऽहम् । अत्रारण्ये बन्धुहीनो मृतवत् एकाकी निवसामि । इदानीं त्वां मित्रम् आसाद्य पुनः सबन्धुः जीवलोकं प्रविष्टोऽस्मि । अधुना तवानुचरेण मया सर्वथा भवितव्यम् इति ।

मृगेणोक्तम्- एवम् अस्तु ।

ततः पश्चाद् अस्तं गते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ । तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति । तौ दृष्ट्वा काकोऽवदत्- सखे चित्राङ्ग ! कोऽयं द्वितीयः ? मृगो ब्रूते- मित्र ! अकस्माद् आगन्तुना सह मैत्री न युक्ता । तन्न भद्रम् आचरितम् ।

### सारांशः

चित्रग्रीवेण पूर्वोक्तरीत्या कथिते सति तत्र विद्यमानः कश्चित् कपोतः किमर्थं कथाम् इदानीं वदति भवान् आपत्काले एव वक्तव्यं न तु इदानीम् इति कृत्वा चित्रग्रीवस्य वाक्ये श्रद्धामकृत्वा सर्वे कपोताः तण्डुलं भोक्तुं तत्र गताः । लोभात् कपोताः जाले लब्धाः । तदानीं चित्रग्रीवः उपायमेकमवदत् । तथाहि – वयं सर्वे इदानीं एतज्जालं नीत्वैव इतः गच्छामः इति । तथा कृते व्याधोऽपि तान् अनुसृतवान् । परन्तु ते पक्षिणः तं जालं नीत्वा बहुदूरं गताः । ततः परं जाले बद्धाः कपोताः चित्रग्रीवमूचुः किं कर्तव्यमिति । तदानीं चित्रग्रीवो वदति मम मित्रं हिरण्यको नाम मूषिकराजा गण्डकीनदीतटे चित्रवने वसति । सः एतस्मात् जालात् अस्मान् मोचयति इति कृत्वा तत्र नीतवान् ।

चित्रवने तावत् सर्वदा आपत्संदेहाक्रान्तः हिरण्यकः स्वगृहं शतद्वारयुक्तं निर्माय वसति । तदानीं चित्रग्रीवं दृष्ट्वा बहुसन्तुष्टः जातः । ततं परं चित्रग्रीवः व्याधदृष्टान्तं तस्मै श्रावितवान् । तं च प्रार्थितवान् एतस्मात् पाशात् मम बान्धवान् प्रथमं विमोचय ततः परं मां मुञ्च इति । परन्तु हिरण्यकः भवन्तं विमोच्य यथासंभवम् अन्यं विमोचयामि इति कथिते सति चित्रग्रीवः यथासंभवं अन्यान् विमुच्य मां मुञ्च इति परमादरेण कथितवान् । एतच्छ्रुत्वा हिरण्यकः अतिसन्तुष्टः । साधु ! साधु ! इति कथित्वैव सर्वान् मुमोच । ततः परं चित्रग्रीवः स्वग्रामं गतवान् हिरण्यकः स्वगृहं गतवान् ।एतत्सर्वं दूरात् पश्यति स्म लघुपतनको नाम काकः । सः संजातहर्षः हा! हिरण्यक भाग्यवानस्ति भवान् । अतः त्वया सह स्निहामि इति अकथयत् । एतच्छ्रुत्वा हिरण्यकः भवान् कः इति पृष्टे काकः वदति – अहं काकः इति । ततः परं हसित्वा हिरण्यकः पृच्छति मम स्नेहेन किं तवेति ।

तदर्थं मृगकाकश्रृगालकथां श्रावयामास । तथाहि – मगधदेशे चम्पावती इति वनमासीत् । तत्र एकः काकः सुबुद्धिनामकः एवं कश्चित् सुन्दरमृगः च द्वौ स्निग्धौ वर्तेते । कदाचित् तत्र क्षुद्रमतिः नाम श्रृगालः आगत्य तं खादितुम् ऐच्छत् । ततः कपटस्नेहेन स्वगृहं नेतव्यमिति धिया मृगस्य सविधे भवता सह मित्रत्वं प्राप्तुमिच्छामि अहमनाथो वसामि अस्मिन् वने अतः मम कोऽपि नास्तीति अवदत् । तच्छ्रुत्वा मृगोऽपि तद्वाक्यं अङ्गीकृत्य मित्रत्वं स्वीकृत्य तस्य गृहं रात्रौ अगच्छत् । तदानीं काकः अवदत् पूर्वं अपरिचितेन कदापि स्नेहः न कर्तव्यः । तथा सति मार्जारेण गृध्रः यथा नष्टः तद्वद्भवानपि नष्टो भवति इति मार्जारकथां आरब्धुम् उपक्रमं कृतवान् ।

## बोधप्रश्नाः

1. वृद्धानां वचनं कदा श्रोतव्यम्?
2. कापुरुषलक्षणम् किम्?
3. आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिविदां सम्मतम् इति केन उक्तम्?
4. भक्ष्यभक्षकयोः प्रीतिः कस्य कारणम्?
5. चम्पावत्यरण्ये कौ स्नेहेन वसतः?

## शब्दावली

1. ईर्षा
2. कापुरुषः
3. लुब्धकः
4. चित्रग्रीवः
5. हिरण्यकः
6. लघुपतनकः
7. चम्पावती

**सन्दर्भग्रन्थः -**

1. हितोपदेशम् – मूलमात्रम्, श्रीलक्ष्मीनारायणमुद्रालयः, बंबई- 1918.

**सहायकग्रन्थाः –**

1. हितोपदेशम् – Commentary by - पण्डित रामेश्वरभट्ट, निर्णयसागरप्रेस, बंबाई-1941.
2. हितोपदेशम्- Commentary by M.R.Kale, Motilal Banarsi Das,Varanasi,1976.

**बोधप्रश्नोत्तराणि** –

1. आपत्काले
2. विपत्काले विस्मरणम्
3. हिरण्यकेन
4. विपत्तेः
5. मृगकाकौ

**अभ्यासप्रश्नाः**

1. अस्मिन् खण्डे कथिताः सर्वे श्लोकाः कण्ठस्थिकर्तव्याः
2. कथानां लघुपरिचयं कुरुत
3. श्लोकस्थान् धातून् चित्वा शतवाक्यानि लिखत

# खण्डः ३

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

अस्मिन्खण्डे गङ्गानदीतीरे गृध्रकूटनाम्नि पर्वते नखादिहीनः जरद्गवनामा कश्चिद् वृद्धगृद्ध्रो आसीदिति एका गृद्ध्रकथा भवति। तस्याः कथायाः द्वारा अतिथेः हननं न कर्तव्यं तत्रापि यः ज्येष्ठः धर्मज्ञानी सुतरां अतिथेः पूजनं कर्तव्यमेव इति नीतिः प्रतिपादिता। एवमतिथेः माहात्म्यमपि विस्तरेण प्रतिपादितम्। एवं चान्द्रायणव्रतस्यापि माहात्म्यं स्पष्टतया प्रतिपादितम्। एवं दुष्टे विश्वासः न कर्तव्यः इति नीतिरपि तया कथया प्रतिपादितं भवति। एवं कथाप्रसङ्गे संप्राप्ते पुनः श्रृगालकथाप्रसङ्गः भवति। ततः परं काकेन सह मृगस्य संवादः प्रतिपादितः तत्र अदृष्टस्य प्राबल्यं प्रतिपादितं भवति। मित्राणां वाक्यं श्रोतव्यमिति नीतिः अनेन प्रतिपादिता।

## ०१-०३ जरद्गवनामगृध्रकथा

तथा चोक्तम्-

अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥ ।५६ ॥

तौ आहतुः– कथम् एतत् ?

काकः कथयति-

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः तस्य कोटरे दैवदुर्विपाकात् गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चित् किञ्चिद् उद्धृत्य तस्मै ददति, तेनासौ जीवति, तेषां शावकरक्षां च करोति । अथ कदाचित् दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षयितुं तत्रागतः । ततस्तम् आयान्तं दृष्ट्वा पक्षि-शावकैः भयार्तैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेन उक्तम्- कोऽयम् आयाति ? दीर्घकर्णो गृध्रम् अवलोक्य सभयम् आह- हा हतोऽस्मि यतोऽयं मां व्यापादयिष्यति ।

अथवा-

तावद् भयस्य भेतव्यं यावद् भयम् अनागतम् ।

आगतं तु भयं वीक्ष्य नरः कुर्याद् यथोचितम् ॥ ।५७ ॥

अधुनातिसन्निधाने पलायितुम् अक्षमः । तद्यथा भवितव्यं तथा भवतु, तावत् विश्वासम् उत्पाद्यास्य समीपम् उपगच्छामीत्यालोच्य तम् उपसृत्याब्रवीत्- आर्य ! त्वाम् अभिवन्दे ।

गृध्रोऽवदत्- कस्त्वम् ?

सोऽवदत्- मार्जारोऽहम् ।

गृध्रो ब्रूते- दूरम् अपसर नो चेत् हन्तव्योऽसि मया ।

मार्जारोऽवदत्- श्रूयतां तावत् मद्वचनम् । ततो यद्यहं वध्यस्तदा हन्तव्यः ।

यतः -

जातिमात्रेण किं कश्चिद्वध्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ॥ ।५८ ॥

गृध्रो ब्रूते- ब्रूहि किम् अर्थम् आगतोऽसि ?

सोऽवदत्- अहम् अत्र गङ्गातीरे नित्यस्नायी निरामिषाशी ब्रह्मचारी चान्द्रायणव्रतम् आचरंस्तिष्ठामि । युष्मान् धर्मज्ञानरताः प्रेमविश्वासभूमयः इति पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति, अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुम् इहागतः । भवन्तश्चैतादृशा धर्मज्ञाः, यन्माम् अतिथिं हन्तुम् उद्यताः ? गृहस्थ- धर्मश्च एषः -

अरावप्युचितं कार्यम् आतिथ्यं गृहम् आगते ।
छेत्तुम् अप्यागते छायां नोपसंहरते द्रुमः ॥ ।५९ ॥

किं च- यदि अन्नं नास्ति, तदा सुप्रीतेनापि वचसा तावद् अतिथिः पूज्य एव ।

तृणानि भूमिः उदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ ।६० ॥

अन्यच्च-

बालो वा यदि वा वृद्धो युवा वा गृहम् आगतः ।
तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः ॥ ।६१ ॥

अपरं च-

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः ॥ ।६२ ॥

अन्यच्च-

अतिथिः यस्य भग्नाशो गृहात् प्रतिनिवर्तते ।
स दत्त्वा दुष्कृतं तस्मै पुण्यम् आदाय गच्छति ॥ ।६३ ॥

अन्यच्च-

उत्तमस्यापि वर्णस्य नीचोऽपि गृहम् आगतः ।
पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः ॥ ।६४ ॥

गृध्रोऽवदत्- मार्जारो हि मांसरुचिः । पक्षिशावकाश्चात्र निवसन्ति । तेनाहम् एव ब्रवीमि । तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति, ब्रूते च- मया धर्मशास्त्रं श्रुत्वा वीतरागेनेदं दुष्करं व्रतं चान्द्रायणम् अध्यवसितम् । यतः परस्परं विवदमानानाम् अपि धर्मशास्त्राणाम् अहिंसा परमो धर्मः इत्य् अत्रैकमत्यम् । यतः:-

सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये ।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ ।६५ ॥

अन्यच्च-

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्वम् अन्यद् हि गच्छति ॥ ।६६ ॥

किं च-

योऽत्ति यस्य यदा मांसम् उभयोः पश्यतान्तरम् ।
एकस्य क्षणिका प्रीतिः अन्यः प्राणैः विमुच्यते ॥ ।६७ ॥

अपि च-

मर्तव्यम् इति यद्दुःखं पुरुषस्योपजायते ।
शक्यस् तेनानुमानेन परो ऽपि परिरक्षितुम् ॥ ।६८ ॥

श्रृणु पुनः-

स्वच्छन्द-वन-जातेन शाकेनापि प्रपूर्यते ।
अस्य दग्धोदरस्यार्थे कः कुर्यात् पातकं महत् ॥ ।६९ ॥

एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः । ततो दिनेषु गच्छत्सु असौ पक्षिशावकान् आक्रम्य स्वकोटरम् आनीय प्रत्यहं खादति । अथ येषाम् अपत्यानि खादितानि । तैः शोकार्तैः विलपद्भिः इतस्ततो जिज्ञासा समारब्धा । तत्परिज्ञाय मार्जारः कोटरान् निःसृत्य बहिः पलायितः । पश्चात् पक्षिभिः इतस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकाः खादिता इति सर्वैः पक्षिभिः निश्चित्य च गृध्रो व्यापादितः ।

अतोऽहं ब्रवीमि- अज्ञातकुलशीलस्य इत्यादि ।

इत्याकर्ण्य स जम्बुकः सकोपम् आह- मृगस्य प्रथमदर्शनदिने भवान् अपि अज्ञातकुलशील एव आसीत् । तत् कथं भवता सह एतस्य स्नेहानुवृत्तिः उत्तरोत्तरं वर्धते ? अथवा-

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीः अपि ।
निरस्त-पादपे देशे एरण्डो ऽपि द्रुमायते ॥ ।७० ॥

अन्यच्च-

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदार-चरितानां तु वसुधैव कुटुम्बकम् ॥ ।७१ ॥

यथा चायं मृगो मम बन्धुस्तथा भवान् अपि । मृगो ऽब्रवीत् कमनेन उत्तरोत्तरेण ? सर्वैः एकत्र विश्रम्भालापैः सुखम् अनुभवद्भिः स्थीयताम् ।

यतः-

न कश्चित् कस्यचिन् मित्रं न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥ ।७२ ॥

काकेन उक्तम्- एवम् अस्तु ।

अथ प्रातः सर्वे यथाभिमतदेशं गताः । एकदा निभृतं श्रृगालो ब्रूते- सखे मृग ! एतस्मिन्न् एव वनैकदेशे सस्यपूर्णं क्षेत्रम् अस्ति । तदहं त्वां तत्र नीत्वा दर्शयामि । तथा कृते सति मृगः प्रत्यहं तत्र गत्वा सस्यं खादति । ततो दिनकतिपयेन क्षेत्रपतिना तद्दृष्ट्वा पाशास्तत्र योजिताः । अनन्तरं पुनः आगतो मृगः तत्र चरन् पाशैः बद्धोऽचिन्तयत्- को माम् इतः कालपाशाद् इव व्याधपाशात् त्रातुं मित्रादन्यः समर्थः ?

अत्रान्तरे जम्बुकस्तत्रागत्य उपस्थितोऽचिन्तयत्- फलितस्तावद् अस्माकं कपटप्रबन्धः । मनोरथसिद्धिः अपि बाहुल्यान्मे भविष्यति । यतः एतस्य उत्कृत्यमानस्य मांसासृग्-लिप्तानि अस्थीनि मया अवश्यं प्राप्तव्यानि । तानि च बाहुल्येन मम भोजनानि भविष्यन्ति । स च मृगस् तं दृष्ट्वा उल्लासितो ब्रूते-सखे ! छिन्धि तावन् मम बन्धनम् । सत्वरं त्रायस्व माम् । यतः-

आपत्सु मित्रं जानीयाद् रणे शूरं ऋणे शुचिम् ।
भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बान्धवान् ॥ ।७३ ॥

अपरं च-
उत्सवे व्यसने प्राप्ते दुर्भिक्षे शत्रुसङ्कटे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ।७४ ॥

जम्बुकः पाशं मुहुः मुहुः विलोक्याचिन्तयत्- दृढस्तावद् अयं बन्धः । ब्रूते च- सखे ! स्नायुनिर्मिताः पाशाः, तद्य भट्टारकवारे कथम् एतान् दन्तैः स्पृशामि ? मित्र ! यदि चित्ते न अन्यथा मन्यसे, तदा प्रभाते यत् त्वया वक्तव्यं तत् कर्तव्यम् इति । अनन्तरं स काकः प्रदोषका मृगमनागतम् अवलोक्य इतस्ततोऽन्विष्यन् तथाविधं तं दृष्ट्वा उवाच- सखे ! किम् एतत् ? मृगेणोक्तम्- अवधीरितसुहृद्वाक्यस्य फलम् एतत् तथा चोक्तम्-

सुहृदां हितकामानां यः श्रृणोति न भाषितम् ।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः ॥ ।७५ ॥

काको ब्रूते- स वञ्चकः क्वास्ते ?

मृगेणोक्तं- मन्मांसार्थी तिष्ठत्यत्रैव ।

काको ब्रूते- मित्र ! उक्तम् एव मया पूर्वम् ।

अपराधो न मेऽस्तीति नैतद् विश्वास-कारणम् ।
विद्यते हि नृशंसेभ्यो भयं गुणवताम् अपि ॥ ।७६ ॥

दीपनिर्वाणगन्धं च सुहृद्वाक्यम् अरुन्धतीम् ।
न जिघ्रन्ति न श्रृण्वन्ति न प्श्यन्ति गतायुषः ॥ ।७७ ॥

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रिय-वादिनम् ।
वर्जयेत् तादृशं मित्रं विष-कुम्भं पयोमुखम् ॥ ।७८ ॥

ततः काको दीर्घं निःश्वस्य उवाच- अरे वञ्चक ! किं त्वया पापकर्मणा कृतम् । यतः-

संलापितानां मधुरैः वचोभिः
मिथ्योपचारैश्च वशीकृतानाम् ।
आशावतां श्रद्दधतां च लोके
किम् अर्थिनां वञ्चयितव्यम् अस्ति ॥ ।७९ ॥

अन्यच्च-

उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम् ।
तं जनम् असत्यसन्धं भगवति वसुधे कथं वहसि ॥ ।८० ॥

दुर्जनेन समं सख्यं वैरं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥ ।८१ ॥

अथवा स्थितिः इयं दुर्जनानाम्-

प्राक् पादयोः पतति खादति पृष्ठमांसं
कर्णे फलं किम् अपि रौति शनैः विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्य् अशङ्कः
सर्वं खलस्य चरितं मशकः करोति ॥ ।८२ ॥

तथा च-

दुर्जनः प्रियवादी च नैतद् विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषम् ॥ ।८३ ॥

अथ प्रभाते स क्षेत्रपतिः लगुडहस्तस्तं प्रदेशम् आगच्छन् काकेनावलोकितः । तम् अवलोक्य काकेनोक्तम्- सखे मृग ! त्वम् आत्मानं मृतवत् सन्दर्श्य वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ । अहं तव चक्षुषी चञ्च्वा किम् अपि विलिखामि, यदाहं शब्दं करोमि, तदा त्वम् उत्थाय सत्वरं पलायिष्यसे ।

मृगस्तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः । अथासौ- आः ! स्वयं मृतोऽसि ? इत्युक्त्वामृगं बन्धनात् मोचयित्वा पाशान् संवरीतुं सत्वरो बभूव । ततः कियद्दूरे अन्तरिते क्षेत्रपतौ स मृगः काकस्य शब्दं श्रुत्वा सत्वरम् उत्थाय पलायितः । तमुद्दिश्य तेन क्षेत्रपतिना प्रकोपात् क्षिप्तेन लगुडेन श्रृगालो व्यापादितः । तथा चोक्तम्-

त्रिभिः वर्षैस्त्रिभिः मासैस्त्रिभिः पक्षैस्त्रिभिः दिनैः ।
अत्युत्कटैः पापपुण्यैः इहैव फलम् अश्नुते ॥ ।८४ ॥

अतोऽहं ब्रवीमिभक्ष्यभक्ष्यकयोः प्रीतिः इत्यादि ।

काकः पुनः आह-

भक्षितेनापि भवता नाहारो मम पुष्कलः ।
त्वयि जीवति जीवामि चित्रग्रीव इवानघ ॥ ।८५ ॥

अन्यच्च-
तिरश्चाम् अपि विश्वासो दृष्टः पुण्यैककर्मणाम् ।
सतां हि साधुशीलत्वात् स्वभावो न निवर्तते ॥ ।८६ ॥

किं च-

साधोः प्रकोपितस्यापि मनो नायाति विक्रियाम् ।
न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया ॥ ।८७ ॥

हिरण्यको ब्रूते- चपलस्त्वम् । चपलेन सह स्नेहः सर्वथा न कर्तव्यः । तथा चोक्तम्-

मार्जारो महिषो मेषः काकः कापुरुषस्तथा ।
विश्वासात् प्रभवन्त्येते विश्वासस्तत्र नो हितः ॥ ।८८ ॥

किं चान्यत्- शत्रुपक्षो भवान् अस्माकम् । शत्रुणा सन्धिः न विधेयम् । उक्तं चैतत्-

शत्रुणा न हि सन्दध्यात् संश्लिष्टेनापि सन्धिना ।
सुतप्तम् अपि पानीयं शमयत्येव पावकम् ॥ ।८९ ॥

दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किम् असौ न भयङ्करः ॥ ।९० ॥

यदशक्यं न तच्छक्यं यच्छक्यं शक्यम् एव तत् ।
नोदके शकटं याति न च नौः गच्छति स्थले ॥ ।९१ ॥

अपरं च-

महताप्यर्थसारेण यो विश्वसिति शत्रुषु ।
भार्यासु च विरक्तासु तदन्तं तस्य जीवनम् ॥ ।९२ ॥

लघुपतनको ब्रूते- श्रुतं मया सर्वं, तथापि ममैतावन् एव सङ्कल्पः । यत्त्वया सह सौहृद्यम् अवश्यं करणीयम् इति । अन्यथा अनाहारेणात्मानं तव द्वारि व्यापादयिष्यामीति । तथा हि-

मृद्घटवत् सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद्दुर्भेद्यश्चाशु सन्धेयः ॥ ।९३ ॥

किं च-

द्रवत्वात् सर्वलोहानां निमित्ताद्मृग-पक्षिणाम् ।
भयाल्लोभाच्च मूर्खाणां सङ्गतः दर्शनात् सताम् ॥ ।९४ ॥

किं च-

नारिकेल-समाकारा दृश्यन्ते हि सुहृज्जनाः ।
अन्ये बदरिकाकारा बहिः एव मनोहराः ॥ ।९५ ॥

अन्यच्च-

स्नेह-च्छेदेऽपि साधूनां गुणा नायान्ति विक्रियाम् ।
भङ्गेऽपि हि मृणालानाम् अनुबध्नन्ति तन्तवः ॥ ।९६ ॥

अन्यच्च-

शुचित्वम् त्यागिता शौर्यं सामान्यं सुख-दुःखयोः ।
दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्-गुणाः ॥ ।९७ ॥

एतैः गुणैः उपेतो भवद्=अन्यो मया कः सुहृत् प्राप्तव्यः ? इत्यादि तद्-वचनम् आकर्ण्य हिरण्यको बहिः निःसृत्याह-आप्यायितो ऽहं भवताम् एतेन वचनामृतेन । तथा चोक्तम्-

घर्मार्तं न तथा सुशीतल-जलैः स्नानं न मुक्तावली
न श्रीखण्ड-विलेपनम् सुखयति प्रत्यङ्गम् अप्यर्पितम् ।
प्रीत्यै सज्जन-भाषितं प्रभवति प्रायो यथा चेतसः
सद्-युक्त्या च परिष्कृतं सुकृतिनाम् आकृष्टि-मन्त्रोपमम् ॥ ।९८ ॥

अन्यच्च-

रहस्य-भेदो याञ्चा च नैष्ठुर्यं चल-चित्तया ।
क्रोधो निःसत्यता द्यूतम् एतन् मित्रस्य दूषणम् ॥ ।९९ ॥

अनेन वचन-क्रमेण तत् एकम् अपि दूषणं त्वयि न लक्ष्यते । यतः-

पटुत्वं सत्यवादित्वं कथा-योगेन बुध्यते ।
अस्तब्धत्वम् अचापल्यं प्रत्यक्षेनावगम्यते ॥ ।१०० ॥

अपरं च-

अन्यथैव हि सौहार्दं भवेत् स्वच्छान्तरात्मनः ।
प्रवर्ततेऽन्यथा वाणी शाठ्योपहत-चेतसः ॥ ।१०१ ॥

मनस्य् अन्यद् वचस्य् अन्यत् कर्मण्य् अन्यद् दुरात्मनाम् ।
मनस्य् एकं वचस्य् एकं कर्मण्य् एकं महात्मनाम् ॥ ।१०२ ॥

तद् भवतु भवतः अभिमतम् एव इत्युक्त्वाहिरण्यको मैत्र्यं विधाय भोजन-विशेषैः वायसं सन्तोष्य विवरं प्रविष्टः । वायसोऽपि स्वस्थानं गतः ।

## १-०४ काकस्य विरक्तिः

ततः प्रभृति तयोः अन्योऽन्याहारप्रदानेन कुशलप्रश्नैः विश्रम्भालापैश्च कियत्-कालो ऽतिवर्तते । एकदा लघु-पतनको हिरण्यकम् आह- सखे ! वायसस्य कष्टतरलभ्याहारम् इदं स्थानम् । तद् एतत् परित्यज्य स्थानान्तरं गन्तुम् इच्छामि ।

हिरण्यको ब्रूते-

स्थान-भ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः ।
इति विज्ञाय मतिमान् स्व-स्थानं न परित्यजेत् ॥ ।१०३ ॥

काको ब्रूते-मित्र ! कापुरुषस्य वचनम् एतत् । यतः-

स्थानम् उत्सृज्य गच्छन्ति सिंहाः सत्-पुरुषा गजाः ।
तत्रैव निधनं यान्ति काकाः कापुरुषा मृगाः ॥ ।१०४ ॥

अन्यच्च-

को वीरस्य मनस्विनः स्व-विषयः को वा विदेशः स्मृतः
यं देशं श्रयते तम् एव कुरुते बाहु-प्रतापार्जितम् ।
यद् दंष्ट्रानख-लाङ्गुल-प्रहरणः सिंहो वनं गाहते
तस्मिन्न् एव हत-द्विपेन्द्र-रुधिरैस्तृष्णां छिनत्त्य् आत्मनः ॥ ।१०५ ॥

हिरण्यको ब्रूते-मित्र क्व गन्तव्यम् ?

तथा चोक्तम्–

चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
नासमीक्ष्य परं स्थानं पूर्वम् आयतनं त्यजेत् ॥ ।१०६ ॥

वायसो ब्रूते-मित्र ! अस्ति सुनिरूपितं स्थानम् ।

हिरण्यकोऽवदत्-किं तत् ?

वायसः कथयति-अस्ति दण्डकारण्ये कर्पूरगौराभिधानं सरः । तत्र चिर-कालोपार्जितः प्रिय-सुहृन्मे मन्थराभिधानः कूर्मः सहज-धार्मिकः प्रतिवसति । पश्य मित्र !

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।
धर्मे स्वीयम् अनुष्ठानं कस्यचित् तु महात्मनः ॥ ।१०७ ॥

स च भोजन-विशेषैः मां संवर्धयिष्यति । हिरण्यको ऽप्याह-तत् किम् अत्रावस्थाय मया कर्तव्यम् ? यतः-

यस्मिन् देशे न सम्मानो न वृत्तिः न च बान्धवः ।
न च विद्यागमः कश्चित् तं देशं परिवर्जयेत् ॥ ।१०८ ॥

अपरं च–

धनिकः श्रोत्रियो राजा नदी वैद्यस् तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥ ।१०९ ॥

अपरं च–

लोक-यात्रा भयं लज्जा दाक्षिण्यं त्याग-शीलता ।
पञ्च यत्र न विद्यन्ते न कुर्यात् तत्र संस्थितिम् ॥ ।११० ॥

अन्यच्च-

तत्र मित्र ! न वस्तव्यं यत्र नास्ति चतुष्टयम् ।
ऋण-दाता च वैद्यश्च श्रोत्रियः सजला नदी ॥ ।१११ ॥

अतो मामपि तत्र नय ।

वायसोऽवदत्-एवम् अस्तु ।

अथ वायसस्तेन मित्रेण सह विचित्रालापसुखेन तस्य सरसः समीपं ययौ । ततो मन्थरो दूराद् एव लघुपतनकम् अवलोक्य उत्थाय यथोचितम् आतिथ्यं विधाय मूषिकस्याप्यतिथि-सत्कारं चकार । यतः-

बालो वा यदि वा वृद्धो युवा वा गृहम् आगतः ।
तस्य पूजा विधातव्या सर्वत्राभ्यागतो गुरुः ॥ ।११२ ॥

तथा-

गुरुः अग्निः द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिः एको गुरुः स्त्रीणां सर्वत्राभ्यागतो गुरुः ॥ ।११३ ॥

अपरं च-

उत्तमस्यापि वर्णस्य नीचो ऽपि गृहम् आगतः ।
पूजनीयो यथा-योग्यं सर्व-देव-मयो ऽतिथिः ॥ ।११४ ॥

## १-०५ हिरण्यकेन कथावर्णनम्

वायसो ऽवदत्-सखे ! मन्थर ! सविशेषपूजाम् असमि विधेहि, यतोऽयं पुण्यकर्मणां धुरीणः कारुण्य-रत्नाकरो हिरण्यकनामा मूषिक-राजः । एतस्य गुणस्तुतिं जिह्वा-सहस्र-द्वयेनापि यदि सर्पराजः कदाचित् कर्तुं समर्थः स्यात् इत्युक्त्वा चित्रग्रीवोपाख्यानं वर्णितवान् । ततो मन्थरः सादरं हिरण्यकं सम्पूज्याह-भद्र ! आत्मनो निर्जन-वनागमन-कारणम् आख्यातुम् अर्हसि ?

हिरण्यकोऽवदत्-कथयामि, श्रूयताम् ।

### सारांशः

भागीरथीतरे जरद्गवो नाम वृद्धगृध्र आसीत् । सः चलितुमसमर्थः आसीत् । तस्य ईदृशीम् स्थितिं दृष्ट्वा सर्वे पक्षिणः स्वस्य भोजनमीषत् दत्वा तं पालितवन्तः । तत्र कदाचित् पक्षिपुत्रान् भोक्तुं दीर्घकर्णो नाम मार्जार आगतः । परन्तु गृद्धः तं दृष्ट्वा त्वं हन्मि इतः गच्छ इति गर्जनं कृतवान् । तच्छ्रुत्वा भीतः मार्जारः कथंचित् कपटस्नेहेन गृद्धं प्रतार्य पक्षिपुत्रान् खादामि इति विचिन्त्य गृद्धस्य कृते एकां कपटकथां श्रावयित्वा

गृहस्थधर्मान् अतिथिसत्कारांश्च सम्यग् उपदिदेश। तेन प्रतारितो गृध्रः तस्य तत्र स्थातुं अनुमतिं दत्तवान्। सः मार्जारः सर्वं पक्षिणं भुक्त्वा ततः चलितः। ततः पुनरागतवतां पक्षिणां कोपे संजाते गृध्रस्य नाशः संजतः। अतः पूर्वम् अपरिचितेन सह स्नेहः न कर्तव्य इति काकः उपदिष्टवान्।

एतच्छ्रुत्वा कुपितः श्रृगालः अवदत् – भवतां कथं मृगेण सह मित्रता लब्धा भवतापि पूर्वं सः अपरिचित एव इति उक्त्वा चलितः। मृगोऽपि काकवाक्ये अनादरबुद्ध्या तस्य औदासीन्यं कृतवान्। ततः श्रृगालस्य कपटनाटकेन मृगः कृषिकस्य जाले बद्धः। तदानीं स्ववृत्तान्तं चिन्तयित्वा खिन्नः सन् काकवाक्यं श्रुत्वा पुनः स्वतन्त्रो जात इति कथां श्रावयामास हिरण्यकः।

ततः परं हिरण्यकस्य वाक्यं श्रुत्वा काकः अवदत् "भवद्भक्षणे मम तृप्तिः न भवति। अतः भवन्तं न भक्ष्ये इत्युक्त्वा भवता सह स्नेहः एव कर्तव्य इति ममाशा विद्यते" इति। यदि भवान् नाङ्गीकरोति तदा अत्रैव अभुक्त्वा मरणं स्वीकरोमि इति च अवादीत्।

एतच्छ्रुत्वा हिरण्यकः तस्य मित्रत्वं स्वीकृत्य बहुकालं स्नेहेन जीवितवान्। ततः कदाचित् काकस्य भोजनं नैव लब्धम्। अतः सः एतद्वनं त्यक्तुकामः आसीत्। तदानीं एनं हिरण्यकं नीत्वा दण्डकारण्ये कर्पूरगौरनामकूपे विद्यमानं मित्रं मन्थरनामकं कूर्मं द्रष्टुं गतवान्। सः द्वयोरपि सम्यक् उपचारं कृतवान्। ततः परं मन्थरोऽपि जनरहिते अस्मिन् वने भवदागमनं किमर्थम् इति पृष्टे तदर्थम् स्वस्य कथां श्रावयामास हिरण्यकः।

**बोधप्रश्नाः**

1. भागीरथीतीरे कः पर्वतः आसीत्?
2. यथा मृगः मम बन्धुः तथा भवानपि इति केन उक्तम्?
3. चान्द्रायणव्रतम् अनुष्ठितमिति केन उक्तम्?
4. सर्वेषां पाण्डित्यं सुकरं कुत्र?
5. मन्थर इति कस्य नाम?

**शब्दावली**

1. जालम्
2. जम्बुकः
3. हिरण्यकः
4. चम्पावती
5. जरद्गवः
6. लघुपतनकः
7. मन्थरः

**सन्दर्भग्रन्थः -**

1. हितोपदेशम् – मूलमात्रम्, श्रीलक्ष्मीनारायणमुद्रालयः, बंबई- 1918.

**सहायकग्रन्थाः –**

1. हितोपदेशम् – Commentary by - पण्डित रामेश्वरभट्ट, निर्णयसागरप्रेस, बंबाई-1941.
2. हितोपदेशम्- Commentary by M.R.Kale, Motilal Banarsi Das,Varanasi,1976.

**बोधप्रश्नोत्तराणि –**

1. काकः
2. गृद्ध्रकूटपर्वतः
3. मार्जारेण
4. परोपदेशे
5. कूर्मस्य

**अभ्यासप्रश्नाः**

1. अस्मिन् खण्डे कथिताः सर्वे श्लोकाः कण्ठस्थिकर्तव्याः
2. कथानां लघुपरिचयं कुरुत
3. श्लोकस्थान् धातून् चित्वा शतवाक्यानि लिखत

# खण्डः ४

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

अस्मिन् खण्डे मित्रलाभे अवशिष्टभागः तथा सुहृद्भेदात् कथाद्वयं च पाठ्यते । तत्र आदौ सन्न्यासिमूषिकयोः कथा भवति । अस्यां कथायां धनं विना जगति कोपि न सहकरोति इति न्यायं बोधयति ग्रन्थकारः । तत्प्रसंगात् कौशाम्बीनगरीस्थचन्दनदासकथा पाठ्यते । तस्यां कथायां वणिजः पत्नी व्यभिचारी बभूव । सः वृद्धः इति कारणात् तस्याः प्रीतिकरः नासीत् । अतः तं परित्यज्य अन्यं स्वीकरोति ततः कुट्टिन्या जारं परिज्ञाय गुप्तेन दण्डिता । तेन अकस्मात् किमपि करोति चेत् अवश्यं लब्धो भवति इति नीतिः बोधिता ।ततः परम् मित्रस्य वैशिष्ट्यं महता श्लोकप्रबन्धेन निरूपितं वर्तते ।ततः भैरवाख्यव्याधस्य कथा भवति तया कथया लोभस्य नाशः एव फलमतः अपेक्षितद्रव्यात् अधिकधनस्योपरि आशा न कर्तव्या इति नीतिः बोधिता । ततश् वीरसेना कथा आसीत् । तत्रैव प्रसङ्गात् कर्पूरतिलकस्य कथापि भवति । तस्यां च कथायां उपायेन यच्छक्यं तदेव शक्यमिति

निरूपितम् । ततः परं मित्रलाभं समाप्य सुहृद्भेदे कथाद्वयं पाठ्यते । तत्र प्रधानकथा भवति सिम्हवृषभकथा तत्प्रसङ्गात् बह्व्यः कथाः आयान्ति ।

## उद्देश्यम्

- मित्रस्य लाभः कथं भवति इति ज्ञातुं शक्यते
- मित्रलाभस्य प्रयोजनं किमिति ज्ञातुं शक्यते
- स्त्रीणां धर्मः कः इति ज्ञातुं शक्यते
- मित्रेण सह कथं वर्तितव्यमिति ज्ञानं भवति
- विभिन्नधातूनां शब्दानां परिचयो भवति
- विभिन्नदेशानां परिचयो भवति

### ०१-०४ सन्यासि-मूषिकयोः कथा

अस्ति चम्पकाभिधानायां नगर्यां परिव्राजकावसथः । तत्र चूडाकर्णो नाम परिव्राजकः प्रतिवसति । स च भोजनावशिष्ट-भिक्षान्न-सहितं भिक्षापात्रं नागदन्तकेऽवस्थाप्य स्वपिति । अहं च तद् अन्नम् उत्प्लुत्य उत्प्लुत्य प्रत्यहं भक्षयामि । अनन्तरं तस्य प्रिय-सुहृद् वीणाकर्णो नाम परिव्राजकः समायातः, तेन सह नाना-कथा-प्रसङ्गावस्थितो मम त्रासार्थं जर्जर-वंश-खण्डेन चूडाकर्णो भूमिम् अताडयत् । तं तथाविधं दृष्ट्वा वीणाकर्ण उवाच-सखे ! किम् इति मम कथा-विरक्तो ऽन्यासक्तो भवान् ? यतः-

मुखं प्रसन्नं विमला च दृष्टिः
कथानुरागो मधुरा च वाणी ।
स्नेहो ऽधिकः सम्भ्रम-दर्शनं च
सदानुरक्तस्य जनस्य लक्ष्म ॥ ।११५ ॥

अदृष्टि-दानं कृत-पूर्व-नाशनम्
आननं दुश्चरितानुकीर्तनम् ।
कथा-प्रसङ्गेन च नाम-विस्मृतिः
विरक्त-भावस्य जनस्य लक्षणम् ॥ ।११६ ॥

चूडाकर्णेनोक्तम्-भद्र ! नाहं विरक्तः, किन्तु पश्य अयं मूषिको ममापकारी सदा पात्रस्थं भिक्षान्नम् उत्प्लुत्य भक्षयति । वीणाकर्णो नागदन्तम् अवलोक्याह-कथम् अयं मूषिकः स्वल्प-बलो ऽप्येतावद् दूरम् उत्पतति ? तद् अत्र केनापि कारणेन भवितव्यम् ।

तथा चोक्तम् – अकस्माद्युवती वृद्धं केशेष्वाकृष्य चुम्बति । पतिं निर्दयमालिङ्ग्य हेतुरत्र भविष्यति ॥१०९॥

चूडाकर्णः पृच्छति–"कथमेतत्? "।

## ०१-०४ वृद्धवणिजस्तथा च तस्य व्यभिचारिस्त्रियाः कथा

वीणाकर्णः कथयति– अस्ति गौडीये कौशाम्बी नाम नगरी । तस्यां चन्दनदासनामा वणिग्महाधनो निवसति । तेन पश्चिमे वयसि वर्तमानेन कामाधिष्ठितचेतसा धनदर्पाल्लीलावती नाम वणिक्पुत्री परिणीता । सा च मकरकेतोर्विजयवैजयन्तीव यौवनवती बभूव । स च वृद्धपतिस्तस्याः संतोषाय नाभवत् ।

यतः,- शशिनीव हिमार्तानां घर्मार्तानां रवाविव ।
मनो न रमते स्त्रीणां जराजीर्णेन्द्रिये पतौ ॥११०॥

अन्यच्च, पतितेषु हि दृष्टेषु पुंसः का नाम कामिता ?।
भैषज्यमिव मन्यन्ते यदन्यमनसः स्त्रियः ॥१११॥

स च वृद्धपतिस्तस्यामतीवानुरागवान्। यतः,

धनाशा जीविताशा च गुर्वी प्राणभृतां सदा ।
वृद्धस्य तरुणी भार्या प्राणेभ्योऽगरीयसी ॥११२॥

नोपभोक्तुं न च त्यक्तुं शक्नोति विषयाञ्जरी ।
अस्थि निदर्शनं श्वेव जिह्वया लेढि केवलम् ॥११३॥

अथ सा लीलावती यौवनदर्पादतिक्रान्तकुलमर्यादा केनापि वणिक्पुत्रेण सहानुरागवती बभूव ।

यतः,

स्वातन्त्र्यं पितृमन्दिरे निवसतिर्यात्रोत्सवे सङ्गतिः-
गोष्ठी पूरुषसन्निधावनियमो वासो विदेशे तथा ।
संसर्गः सह पुंश्चलीभिरसकृद्वृत्तेर्निजायाः क्षतिः
पत्युर्वार्धकमीर्षितं प्रवसनं नाशस्य हेतुः स्त्रियः ॥११४॥

अपरं च,-

पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्।
स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि षट् ॥११५॥

स्थानं नास्ति क्षणं नास्ति नास्ति प्रार्थयिता नरः ।
तेन नारद! नारीणां सतीत्वमुपजायते ॥११६॥

न स्त्रीणामप्रियः कश्चित्प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम् ॥११७॥

अपरं च,

घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान् ।
तस्माद्घृतं च वह्निं च नैकत्र स्थापयेद्बुधः ॥११८॥

मात्रा स्वस्रा दुहित्रा वा नो विविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ ११९॥

न लज्जा न विनीतत्वं न दाक्षिण्यं न भीरुता ।
प्रार्थनाभाव एवैकं सतीत्वे कारणं स्त्रियाः ॥१२०॥

पिता रक्षति कौमारे भर्ता रक्षति यौवने । पुत्रश्च स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥१२१॥

एकदा सा लीलावती रत्नावलीकिरणकर्बुरे पर्यङ्के तेन वणिक्पुत्रेण सह विश्रम्भालापैः सुखासीना तमलक्षितोपस्थितं पतिमवलोक्य सहसोत्थाय केशेष्वाकृष्य गाढमालिङ्ग्य चुम्बितवती । तेनावसरेण जारश्च पलायितः ।

उक्तं च,
उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ।
स्वभावेनैव तच्छास्त्रं स्त्रीबुद्धौ सुप्रतिष्ठितम् ॥१२२॥

तदालिङ्गनमवलोक्य समीपवर्तिनी कुट्टन्यचिन्तयत्— “अकस्मादियमेनमुपगूढवती” इति ततस्तया कुटन्या तत्कारणं परिज्ञाय सा लीलावती गुप्तेन दण्डेन दण्डिता;

अतोऽहं ब्रवीमि— “अकस्माद्युवती वृद्धम्” इत्यादि । मूषिकबलोपष्टम्भेन केनापि कारणेनात्र भवितव्यम् ।

चूडाकर्णेनोक्तम्-भद्र ! नाहं विरक्तः, किन्तु पश्य अयं मूषिको ममापकारी सदा पात्रस्थं भिक्षान्नम् उत्प्लुत्य भक्षयति । वीणाकर्णो नागदन्तम् अवलोक्याह-कथम् अयं मूषिकः स्वल्प-बलो ऽप्येतावद् दूरम् उत्पतति ? तद् अत्र केनापि कारणेन भवितव्यम् ।

क्षणं विचिन्त्य परिव्राजकेनोक्तम्-कारणं चात्र धन-बाहुल्यम् एव प्रतिभाति । यतः-

धनवान् बलवान् लोके सर्वः सर्वत्र सर्वदा ।
प्रभुत्वं धन-मूलं हि राज्ञाम् अप्य् उपजायते ॥ ।११७ ॥

ततः खनित्रम् आदाय तेन परिव्राजकेन विवरं खनित्वा चिर-सञ्चितं मम धनं गृहीतम् । ततः प्रभृति प्रत्यहं निज-शक्ति-हीनः सत्त्वोत्साह-रहितः स्वाहारम् अप्य् उत्पादयितुम् अक्षमः सन्न् आसं मन्दं मन्दम् उपसर्पन् चूडाकर्णेनावलोकितः । ततस् तेनोक्तम्-

धनेन बलवान् लोको धनाद् भवति पण्डितः ।
पश्यैनं मूषिकं पापं स्वजाति-समतां गतम् ॥ ।११८ ॥

किं च-

अर्थेन तु विहीनस्य पुरुषस्याल्प-मेधसः ।
क्रिया सर्वा विनश्यन्ति ग्रीष्मे कुसरितो यथा ॥ ।११९ ॥

अपरं च-

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स हि पण्डितः ॥ ।१२० ॥

अपरं च-

अपुत्रस्य गृहं शून्यं सन्-मित्र-रहितस्य च ।
मूर्खस्य च दिशः शून्याः सर्व-शून्या दरिद्रता ॥ ।१२१ ॥

अपरं च-

दारिद्र्यान् मरणाद् वापि दारिद्र्यम् अवरं स्मृतम् ।
अल्प-क्लेशेन मरणं दारिद्र्यम् अतिदुःसहम् ॥ ।१२२ ॥

अन्यच्च-

तानीन्द्रियाण्य् अविकलानि तद् एव नाम
सा बुद्धिः अप्रतिहता वचनं तद् एव ।
अर्थोष्मणा विरहितः पुरुषः स एव
अन्यः क्षणेन भवतीति विचित्रम् एतत् ॥ ।१२३ ॥

एतत् सर्वम् आकर्ण्य मयालोचितं-ममान्नावस्थानम् अयुक्तम् इदानीम् ।

यतः,-
अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनं चापमानं च मतिमान्न प्रकाशयेत्॥ १३०॥

तथा चोक्तम्-

अत्यन्त-विमुखे दैवे व्यर्थे यत्ने च पौरुषे ।
मनस्विनो दरिद्रस्य वनाद् अन्यत् कुतः सुखम् ॥ ।१२४ ॥

अन्यच्च-

मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति ।
अपि निर्वाणम् आयाति नानलो याति शीतताम् ॥ ।१२५ ॥

किं च-

कुसुम-स्तवकस्येव द्वे वृत्ती तु मनस्विनः ।
सर्वेषां मूर्ध्नि वा तिष्ठेद् विशीर्येत वनेऽथवा ॥ ।१२६ ॥

यच्चान्यस्मै एतद्वृत्तान्तकथनं तदप्यनुचितम् ।

यच्चात्रैव याञ्चया जीवनं तदप्यतीवगर्हितम् । १२७

यतः-

वरं विभव-हीनेन प्राणैः सन्तर्पितो ऽनलः ।
नोपचार-परिभ्रष्टः कृपणः प्राथ्र्यते जनः ॥ ।१२८ ॥

अन्यच्च-
दारिद्र्याद् ध्रियम् एति ह्री-परिगतः सत्त्वात् परिभ्रश्यते
निःसत्त्वं परिभूयते परिभवान् निर्वेदम् आपद्यते ।
निर्विण्णः शुचम् एति शोक-फिहितो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयम् एत्य् अहो निधनता सर्वापदाम् आस्पदम् ॥ ।१२९ ॥

किं च-
वरं मौनं कार्यं न च वचनम् उक्तं यद् अनृतं
वरं क्लैब्यं पुंसां न च पर-कलत्राभिगमनम् ।
वरं प्राण-त्यागो न च पिशुन-वाक्येष्व् अभिरुचिः
वरं भिक्षाशित्वं न च पर-धनास्वादन-सुखम् ॥ ।१३० ॥

वरं शून्या शाला न च खलु वरो दुष्ट-वृषभो
वरं वेश्या पत्नी न पुनः अविनीता कुल-वधूः ।

वरं वासो ऽरण्ये न पुनः अविवेकाधिप-पुरे
वरं प्राण-त्यागो न पुनः अधमानाम् उपगमः ॥ ।१३१ ॥

अपि च-

सेवेव मानम् अखिलं ज्योत्स्नेव तमो जरेव लावण्यम् ।
हरि-हर-कथेव दुरितं गुण-शतम् अप्यर्थिता हरति ॥ ।१३२ ॥

तत् किम् अहं पर-पिण्डेन आत्मानं पोषयामि ? कष्टं भोः ! तदपि द्वितीयं मृत्यु-द्वारम् ।

यतः,– पल्लवग्राहि पाण्डित्यं क्रयक्रीतं च मैथुनम् ।
भोजनं च पराधीनं तिस्रः पुंसां विडम्बनाः ॥

अपरं च,–

रोगी चिर-प्रवासी परान्न-भोजी परावसथ-शायी ।
यज् जीवति तन् मरणं यन् मरणं सो ऽस्य विश्रामः ॥ ।१३३ ॥

इत्यालोच्यापि लोभात् पुनः अपि तदीयम् अन्नं ग्रहीतुं ग्रहम् अकरवम् । तथा चोक्तम्-

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्तो दुःखम् आप्नोति परत्रेह च मानवः ॥ ।१३४ ॥

ततो ऽहं मन्दं मन्दम् उपसर्पंस् तेन वीणाकर्णेन जर्जर-वंश-खण्डेन ताडितश् चाचिन्तयम्-लुब्धो ह्यसन्तुष्टो नियतम् आत्म-द्रोही भवति । तथा च-

धन-लुब्धो ह्यसन्तुष्टो ऽनियतात्माजितेन्द्रियः ।
सर्वा एवापदस्तस्य यस्य तुष्टं न मानसम् ॥ ।१३५ ॥

सर्वाः सम्पत्तस्यस्तस्य सन्तुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्मावृतेव भूः ॥ ।१३६ ॥

अपरं च-

सन्तोषामृत-तृप्तानां यत् सुखं शान्त-चेतसाम् ।
कुतस्तद्-धन-लुब्धानाम् इतश् चेतश्च धावताम् ॥ ।१३७ ॥

किं च-

तेनाधीतं श्रुतं तेन तेन सर्वम् अनुष्ठितम् ।
येनाशाः पृष्ठतः कृत्वा नैराश्यम् अवलम्बितम् ॥ ।१३८ ॥

अपि च-

असेवितेश्वर-द्वारम् अदृष्ट-विरह-व्यथम् ।
अनुक्त-क्लीब-वचनं धन्यं कस्यापि जीवनम् ॥ ।१३९ ॥

न योजन-शतं दूरं वाह्यमानस्य तृष्णया ।
सन्तुष्टस्य कर-प्राप्तेऽप्यर्थे भवति नादरः ॥ ।१४० ॥

तद् अत्र अवस्थोचित-कार्य-परिच्छेदः श्रेयान् ।

को धर्मो भूत-दया किं सौख्यं नित्यम् अरोगिना जगति ।
कः स्नेहः सद्-भावः किं पाण्डित्यं परिच्छेदः ॥ ।१४१ ॥

तथा च-

परिच्छेदो हि पाण्डित्यं यदापन्ना विपत्तयः ।
अपरिच्छेद-कर्तॄणां विपदः स्युः पदे पदे ॥ ।१४२ ॥

तथा हि-

त्यजेद् एकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।

ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ ।१४३ ॥

अपरं च-

पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरम् ।

विचार्य खलु पश्यामि तत् सुखं यत्र निर्वृतिः ॥ ।१४४ ॥

इत्यालोच्याहं निर्जन-वनम् आगतः ।

यतः–

वरं वनं व्याघ्र-गजेन्द्र-सेवितं

द्रुमालयः पत्र-फलाम्बु-भक्षितम् ।

तृणानि शय्या वसनं च वल्कलं

न बन्धु-मध्ये धन-हीन-जीवनम् ॥ ।१४५ ॥

अतः-

संसार-विषय-वृक्षस्य द्वे एव रसवत् फले ।

काव्यामृत-रसास्वादः सङ्गमः सज्जनैः सह ॥ ।१४६ ॥

अपरं च-

सत्-सङ्गः केशवे भक्तिः गङ्गाम्भसि निमज्जनम् ।

असारे खलु संसारे त्रीणि साराणि भावयेत् ॥ ।१४७ ॥

मन्थर उवाच-

अर्थाः पाद-रजोपमा गिरि-नदी-वेगोपमं यौवनम्

आयुष्यं जल-बिन्दु-लोल-चपलं फेनोपमं जीवनम् ।

धर्मं यो न करोति निश्चल-मतिः स्वर्गार्गलोद्घाटनं

पश्चात्-ताप-हतो जरा-परिणतः शोकाग्निना दह्यते ॥ ।१४८ ॥

युष्माभिः अतिसञ्चयः कृतः । तस्यायं दोषः । श्रृणु-

उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।

तडागोदर-संस्थानां परीवाहैवाम्भसाम् ॥ ।१४९ ॥

अन्यच्च-

यद् अधो ऽधः क्षितौ वित्तं निचखान मितम्पचः ।

तद्-अधो निलयं गन्तुं चक्रे पन्थानम् अग्रतः ॥ ।१५० ॥

यतः-

निज-सौख्यं निरुन्धानो यो धनार्जनम् इच्छति ।

परार्थ-भार-वाहीव स क्लेशस्यैव भाजनम् ॥ ।१५१ ॥

तथा चोक्तं-

दानोपभोग-हीनेन धनेन धनिनो यदि ।

भवामः किं न तेनैव धनेन धनिनो वयम् ॥ ।१५२ ॥

यतः-

धनेन किं यो न ददाति नाश्नुते

बलेन किं यश्च रिपून्न याधत्ते ।

श्रुतेन किं यो न च धर्मम् आचरेत्

किम् आत्मना यो न जितेन्द्रियो भवेत् ॥ ।१५३ ॥

अन्यच्च–

असम्भोगेन सामान्यं कृपणस्य धनं परैः ।

अस्येदम् इति सम्बन्धो हानौ दुःखेन गम्यते ॥१५४॥

अपि च–

न देवाय न विप्राय न बन्धुभ्यो न चात्मने ।

कृपणस्य धनं याति वह्नितस्करपार्थिवैः ॥१५५॥

तथा चोक्तम्-

दानं प्रिय-वाक्-सहितं

ज्ञानम् अगर्वं क्षमान्वितं सौर्यम् ।

त्यागं सहितं च वित्तं

दुर्लभम् एतच्चतुः भद्रम् ॥ ।१५६ ॥

उक्तं च-

कर्तव्यः सञ्चयो नित्यं न तु कार्यो ऽतिसञ्चयः ।

अतिसञ्चय-शीलोऽयं धनुषा जम्बुको हतः ॥ ।१५७ ॥

तावाहतुः-कथम् एतत् ?

मन्थरः कथयति-

## ०१-०५ मूर्खजम्बुकः

कर्तव्यः सञ्चयो नित्यं न तु कार्यो ऽतिसञ्चयः ।
अतिसञ्चय-शीलो ऽयं धनुषा जम्बुको हतः ॥ ।१५७ ॥

आसीत् कल्याण-कटक-वास्तव्यो भैरवो नाम व्याधः । स चैकदा मांस-लुब्धो धनुः आदाय मृगम् अन्विष्यन् विन्ध्याटवी-मध्यं गतः । तत्र तेन मृग एको व्यापादितः । ततो मृगम् आदाय गच्छता तेन घोराकृतिः शूकरो दृष्टः । ततस् तेन मृगं भूमौ निधाय शूकरः शरेण हतः । शूकरेणाप्यागत्य प्रलय-घन-घोर-गर्जनं कुर्वाणेन स व्याधो मुष्क-देशे हतः छिन्न-द्रुम इव पपात । तथा चोक्तम्-

जलम् अग्निः विषं शस्त्रं क्षुद् व्याधिः पतनं गिरेः ।
निमित्तं किञ्चिद् आसाद्य देही प्राणैः विमुच्यते ॥ ।१५८ ॥

अथ तयोः पादास्फालनेन एकः सर्पो ऽपि मृतः । अत्रान्तरे दीर्घरावो नाम जम्बुकः परिभ्रमनाहारार्था तान् मृतान् मृग-व्याध-सर्प-शूकरान् अपश्यत् । आलोक्याचिन्तयच्च-अहो भाग्यम् ! अद्य महद् भोज्यं मे समुपस्थितम् ।

अथवा-

अचिन्तितानि दुःखानि यथैवायान्ति देहिनाम् ।
सुखान्य् अपि तथा मन्ये दैवम् अत्रातिरिच्यते ॥ ।१५९ ॥

मासम् एकं नरो याति द्वौ मासौ मृग-शूकरौ ।
अहिः एकं दिनं याति अद्य भक्ष्यो धनुर्गुणः ॥ ।१६० ॥

ततः प्रथम-बुभुक्षायाम् इदं निःस्वादु कोदण्ड-लग्नं स्नायु-बन्धनं खादामि, इत्युक्त्वातथाकरोत् । ततश्छिन्ने स्नायु-बन्धने द्रुतम् उत्पतितेन धनुषा हृदि निर्भिन्नः स दीर्घरावः पञ्चत्वं गतः ।

अतोऽहं ब्रवीमि कर्तव्यः सञ्चयो नित्यम् इत्यादि । तथा च-

यद्ददाति यद् अश्नाति तद् एव धनिनो धनम् ।
अन्ये मृतस्य क्रीडन्ति दारैः अपि धनैः अपि ॥ ।१६१ ॥

किं च-

यद् ददासि विशिष्टेभ्यो यच् चाश्नासि दिने दिने ।
तत् ते वित्तम् अहं मन्ये शेषं कस्यापि रक्षसि ॥ ।१६२ ॥

यातु, किम् इदानीम् अतिक्रान्तोपवर्णनेन । यतः-

नाप्रायम् अभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्स्व् अपि न मुह्यन्ति नराः पण्डित-बुद्धयः ॥ ।१६३ ॥

तत् सखे ! सर्वदा त्वया सोत्साहेन भवितव्यम्, यतः-

शास्त्राण्य् अधीत्यापि भवन्ति मूर्खा
यस् तु क्रियावान् पुरुषः स विद्वान् ।
सुचिन्तितं चौषधम् आतुराणां
न नाम-मात्रेण करोत्य् अरोगम् ॥ ।१६४ ॥

अन्यच्च-

न स्वल्पम् अप्यध्यवसाय-भीरोः
करोति विज्ञान-विधिः गुणं हि ।
अन्धस्य किं हस्त-तल-स्थितो ऽपि
प्रकाशयत्य् अर्थम् इह प्रदीपः ॥ ।१६५ ॥

तद् अत्र सखे दशातिशेषेण शान्तिः करणीया। एतद् अप्यतिकष्टं त्वया न मन्तव्यम्।

राजा कुलवधूर्विप्रा मन्त्रिणश्च पयोधराः।
स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः ॥१७३॥

इति विज्ञाय मतिमान्स्वस्थानं न परित्यजेत्। कापुरुषवचनमेतत्।

यतः–
स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषा गजाः।
तत्रैव निधनं यान्ति काकाः कापुरुषा मृगाः ॥१७४॥

को वीरस्य मनस्विनः स्वविषयः, कोपा विदेशस्तथा
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम्।
यद्दंष्ट्रानखलाङ्गलप्रहरणः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः ॥१७५॥

अन्यच्च

सुखम् आपतितं सेव्यं दुःखम् आपतितं तथा।
चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ॥१६६॥

अपरं च–

सुखम् आपतितं सेव्यं दुःखम् आपतितं तथा।
चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ॥ ।१६६ ॥

अपरं च-

निपानम् इव मण्डूकाः सरः पूर्णम् इवाण्डजाः ।
सोद्योगं नरम् आयान्ति विवशाः सर्व-सम्पदः ॥ ।१६७ ॥

अपि च-

उत्साह-सम्पन्नम् अदीर्घ-सूत्रं क्रिया-विधिज्ञं व्यसनेष्व् असक्तम् ।
शूरं कृतज्ञं दृढ-सौहृदं च- लक्ष्मीः स्वयं वाञ्छति वास-हेतोः ॥ ।१६८ ॥

विशेषतश्च-

विनाप्यर्थैः धीरः स्पृशति बहुमानोन्नति-पदं
समायुक्तो ऽप्यर्थैः परिभव-पदं याति कृपणः ।
स्वभावाद् उद्भूतां गुण-समुदयावाप्ति-विषयां
द्युतिं सैंहीं श्वा किं धृत-कनक-मालो ऽपि लभते ॥ ।१६९ ॥

किं च-

धनवान् इति हि मदस् ते किं गत-विभवो विषादम् उपयासि ।
कर-निहत-कन्दुक-समाः पातोत्पाता मनुष्याणाम् ॥ ।१७० ॥

अन्यच्च–

वृत्त्य्-अर्थं नातिचेष्टते सा हि धात्रैव निर्मिता ।
गर्भाद् उत्पतिते जन्तौ मातुः प्रस्रवतः स्तनौ ॥ ।१७१ ॥

अपि च सखे श्रृणु-

येन शुक्ली-कृता हंसाः शुकाश्च हरितीकृताः ।
मयूराश् चित्रिता येन स ते वृत्तिं विधास्यति ॥ ।१७२ ॥

अपरं च सतां रहस्यं श्रृणु, मित्र !

जनयन्त्य् अर्जने दुःखं तापयन्ति विपत्तिषु ।
मोहयन्ति च सम्पत्तौ कथम् अर्थाः सुखावहाः ॥ ।१७३ ॥

अपरं च-

धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।
प्रक्षालनाद् धि पङ्कस्य दूराद् अस्पर्शनं वरम् ॥ ।१७४ ॥

यतः-

यथाआमिषम् आकाशे पक्षिभिः श्वापदैः भुवि ।
भक्ष्यते सलिले मत्स्यैस्तथा सर्वत्र वित्तवान् ॥ ।१७५ ॥

अन्यच्च-

राजतः सलिलाद् अग्नेश् चोरतः स्वजनाद् अपि ।
भयम् अर्थवतां नित्यं मृत्योः प्राण-भृताम् इव ॥ ।१७६ ॥

तथा हि-

जन्मनि क्लेश-बहुले किं नु दुःखम् अतः परम् ।
इच्छा-सम्पद् यतो नास्ति यच् चेच्छा न निवर्तते ॥ ।१७७ ॥

अन्यच्च भ्रातः श्रृणु-

धनं तावद् असुलभं लब्धं कृच्छ्रेण पाल्यते ।
लब्ध-नाशो यथा मृत्युस्तस्माद् एतन्न चिन्तयेत् ॥ ।१७८ ॥

सा तृष्णा चेत् परित्यक्ता को दरिद्रः क ईश्वरः ।
तस्याश् चेत् प्रसरो दत्तो दास्यं च शिरसि स्थितम् ॥ ।१७९ ॥

अपरं च-

यद् यद् एव हि वाञ्छेत ततो वाञ्छा प्रवर्तते ।
प्राप्त एवार्थतः सो ऽर्थो यतो वाञ्छा निवर्तते ॥ ।१८० ॥

किं बहुना, विश्रम्भालापैः मयैव सहात्र कालो नीयताम् । यतः-

आम्रणान्ताः प्रणयाः कोपाश्च क्षण-भङ्गुराः ।
परित्यागाश्च निःसङ्गा न भवन्ति महात्मनाम् ॥ ।१८१ ॥

इति श्रुत्वा लघुपतनको ब्रूते-धन्यो ऽसि मन्थर ! सर्वथा आश्रयणीयो ऽसि । यतः-

सन्त एव सतां नित्यम् आपद्-उद्धरण-क्षमाः ।
गजानां पङ्क-मग्नानां गजा एव धुरन्धराः ॥ ।१८२ ॥

अपरं च-

श्लाघ्यः स एको भुवि मानवानां
स उत्तमः सत्-पुरुषः स धन्यः ।
यस्यार्थिनो वा शरणागता वा
नाशाविभङ्गा विमुखाः प्रयान्ति ॥ ।१८३ ॥

तद् एवं ते स्वेच्छाहार-विहारं कुर्वाणाः सन्तुष्टाः सुखं निवसन्ति स्म ।

# १-०६ चित्राङ्गागमनम्

अथ कदाचित् चित्राङ्गनामा मृगः केनापि त्रासितस्तत्रागत्य मिलितः। तत्-पश्चाद् आयान्तं भय-हेतुं सम्भाव्य मन्थरो जलं प्रविष्टः। मूषिकश्च विवरं गतः, काको ऽपि उड्डीय वृक्षाग्रम् आरूढः। ततो लघुपतनकेन सुदूरं निरूप्य भय-हेतुः न को ऽप्यवलम्बितः। पश्चात् तद्-वचनाद् आगत्य पुनः सर्वे मिलित्वा तत्रैवोपविष्टाः। मन्थरेणोक्तं-भद्र मृग ! कुशलं ते ? स्वेच्छया उदकाद्याहारो ऽनुभूयताम्। अत्रावस्थानेन वनम् इदं सनाथीक्रियताम्।

चित्राङ्गो ब्रूते-लुब्धक-त्रासितो ऽहं भवतां शरणम् आगतः। ततश्च, भवद्भिः सह मित्रत्वम् इच्छामि। भवन्तश्च अनुकम्पयन्तु मैत्र्येण। यतः-

लोभाद् वाथ भयाद् वापि यस् त्यजेच् छरणागतम्।
ब्रह्म-हत्या-समं तस्य पापम् आहुः मनीषिणः ॥ ।१८४ ॥

हिरण्यकोऽप्यवदत्-मित्रत्वं तावद् अस्माभिः सह, अयत्नेन निष्पन्नं भवतः। यतः-

औरसं कृत-सम्बन्धं तथा वंश-क्रमागतम्।
रक्षकं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुः-विधम् ॥ ।१८५ ॥

तद् अत्र भवता स्व-गृह-निर्विशेषेण स्थीयताम्। तच् छ्रुत्वा मृगः सानन्दो भूत्वा कृत-स्वेच्छाहारः पानीयं पीत्वा जलासन्न-वट-तरु-च्छायायाम् उपविष्टः।

अथ मन्थरो ब्रूते-सखे मृग ! केन त्रासितो ऽसि ? अस्मिन् निर्जने वने कदाचित् किं व्याधाः सञ्चरन्ति ?

मृगेणोक्तम्- अस्ति कलिङ्ग-विषये रुक्माङ्गदो नाम नृपतिः। स च दिग्विजय-व्यापार-क्रमेण आगत्य चन्द्रभागा-नदी-तीरे समावेशित-कटको वर्तते, प्रातश्च तेनात्रागत्य कर्पूर-सरः समीपे भवितव्यम् इति व्याधानां मुखात् किंवदन्ती श्रूयते। तद् अत्रापि प्रातः-अवस्थानं भय-हेतुकम् इत्यालोच्य यथा कार्यं तथा आरभ्यताम्।

तच् छ्रुत्वा कूर्मः स-भयम् आह-मित्र ! जलाशयान्तरं गच्छामि ।

काक-मृगावपि उक्तवन्तौ-मित्र ! एवम् अस्तु !

हिरण्यको विमृश्याब्रवीत्-पुनः जलाशये प्राप्ते मन्थरस्य कुशलम् । स्थले गच्छतो ऽस्य का विधा ?

अम्भांसि जल-जन्तूनां दुर्गं दुर्ग-निवासिनाम् ।

स्व-भूमिः श्वापदादीनां राज्ञां सैन्यं परं बलम् ॥ ।१८६ ॥

स्वयं वीक्ष्य यथा वध्वाः पीडितं कुचकुड्मलम् ।

वणिक्पुत्रोऽभवद्दुःखी त्वं तथैव भविष्यसि ॥१९७॥

ते ऊचुः—"कथमेतत् ?"। हिरण्यकः कथयति—

## ०१-०५ तुङ्गबलो नाम राजपुत्रस्य कथा

अस्ति कान्यकुब्जविषये वीरसेनो नाम राजा । तेन वीरपुरनाम्नि नगरे तुङ्गबलो नाम राजपुत्रो भोगपतिः कृतः । स च महाधनस्तरुण एकदा स्वनगरे भ्राम्यन्नतिप्रौढयौवनां लावण्यवतीं नाम वणिक्पुत्रवधूमालोकयामास । ततः स्वहर्म्यं गत्वा स्मराकुलमतिस्तस्याः कृते दूतीं प्रेषितवान् ।

यतः,—

सन्मार्गे तावदास्ते, प्रभवति पुरुषस्तावदेवेन्द्रियाणां,

लज्जां तावद्विधत्ते, विनयमपि समालम्बते तावदेव ।

भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते

यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥

सापि लावण्यवती तदवलोकनक्षणात्प्रभृति स्मरशरप्रहारजर्जरितहृदया तदेकचित्ताऽभवत् ।

तथा ह्युक्तम्,–

असत्यं साहसं माया मात्सर्यं चातिलुब्धता ।
निर्गुणत्वमशौचत्वं स्त्रीणां दोषाः स्वभावजाः ॥१९९॥

अथ दूतीवचनं श्रुत्वा लावण्यवत्युवाच—"अहं पतिव्रता कथमेतस्मिन्नधर्मे पतिलङ्घने प्रवर्ते ?"

यतः,–

सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥२००॥

न सा भार्येति वक्तव्या यस्या भर्ता न तुष्यति ।
तुष्टे भर्तरि नारीणां सन्तुष्टाः सर्वदेवताः ॥२०१॥

ततो यद्यदादिशति मे प्राणेश्वरस्तदेवाहमविचारितं करोमि। दूत्योक्तम्—"सत्यतममेतत् ।" लावण्यवत्युवाच– ध्रुवं सत्यमेतत् ॥

ततो दूतिकया गत्वा तत्तत्सर्वं तुङ्गबलस्याग्रे निवेदितम् । तच्छ्रुत्वा तुङ्गबलोऽब्रवीत्— "विषमेषुणा व्रणितहृदयस्तां विना कथमहं जीविष्यामि?" कट्टन्याह— स्वमिनानीय समर्पयितव्या इति । स प्राह– कथमेतच्छक्यम् ?। कुट्टन्याह— उपायः क्रियताम् ।

तथा चोक्तम्,–

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
श्रृगालेन हतो हस्ती गच्छता पङ्कवर्त्मना॥२०२॥

राजपुत्रः पृच्छति— कथमेतत्? सा कथयति–

# ०१-०६ कर्पूरतिलको नाम हस्तिनः कथा

उपायेन हि यच् छक्यं न तच् छक्यं पराक्रमैः ।
काकी कनक-सूत्रेण कृष्ण-सर्पम् अघातयत् ॥ ।१८७ ॥

तद्यथा-

अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती । तम् अवलोक्य सर्वे शृगालाश् चिन्तयन्ति स्म । यद्य् अयं केनाप्य् उपायेन म्रियते, तदास्माकम् एतेन देहेन मास-चतुष्टयस्य स्वेच्छा-भोजनं भवेत् । ततस्तन्-मध्याद् एकेन वृद्ध-शृगालेन प्रतिज्ञा कृता । मया बुद्धि-प्रभावाद् अस्य मरणं साधयितव्यम् । अनन्तरं स वञ्चकः कर्पूरतिलक-समीपं गत्वा साष्टाङ्ग-पातं प्रणम्योवाच-देव ! दृष्टिप्रसादं कुरु ।

हस्ती ब्रूते- कस्त्वम् ? कुतः समायातः ?

सोऽवदत्-जम्बुकोऽहं सर्वैः वनवासिभिः पशुभिः मिलित्वा भवत्-सकाशं प्रस्थापितः । यद् विना राज्ञा स्थातुं न युक्तम् । तदत्राटवीराज्येऽभिषेक्तुं भवान् सर्वस्वामिगुणोपेतो निरूपितः । यतः-

कुलाचारजनाचारैः अतिशुद्धः प्रतापवान् ।
धार्मिको नीति-कुशलः स स्वामी युज्यते भुवि ॥ ।१८८ ॥

अपरं च पश्य-

राजानं प्रथमं विन्देत् ततो भार्यां ततो धनम् ।
राजन्य् असति लोकेऽस्मिन् कुतो भार्या कुतो धनम् ॥ ।१८९ ॥

अन्यच्च-

पर्जन्य इव भूतानाम् आधारः पृथिवी-पतिः ।
विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥ ।१९० ॥

किं च-

नियत-विषय-वर्ती प्रायशो दण्ड-योगाज्
जगति पर-वशेऽस्मिन् दुर्लभः साधु-वृत्तेः ।
कृशम् अपि विकलं वा व्याधितं वाधनं वा
पतिम् अपि कुल-नारी दण्ड-भीत्याभ्युपैति ॥ ।१९१ ॥

तद्यथा लग्न-वेला न चलति तथा कृत्वा सत्वरम् आगम्यतां देवेन । इत्युक्त्वाउत्थाय चलितः । ततोऽसौ राज्य-लाभाकृष्टः कर्पूरतिलकः श्रृगाल-दर्शित-वर्त्मना धावन् महा-पङ्के निमग्नः । हस्तिनोक्तम्- सखे श्रृगाल ! किम् अधुना विधेयम् ? महा-पङ्के पतितोऽहं म्रिये । परावृत्य पश्य !

श्रृगालेन विहस्योक्तम्- देव ! मम पुच्छाग्रे हस्तं दत्त्वा उत्तिष्ठ । यस्मात् मद्विधस्य वचसि त्वया विश्वासः कृतः, तस्य फलम् एतत् । तदनुभूयताम् अशरणं दुःखम् । तथा चोक्तम्-

यदा सत्सङ्गरहितो भविष्यसि भविष्यसि ।
यदासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥ ।१९२ ॥

ततो महा-पङ्के निमग्नो हस्ती श्रृगालैः भक्षितः ।

अतोऽहं ब्रवीमि-उपायेन हि यच्छक्यम् इत्यादि ।

ततः कुट्टिन्युपदेशेन तं चारुदत्तनामानं वणिक्पुत्रं स राजपुत्रः सोवकं चकार । ततोऽसौ तेन सर्वविश्वासकार्येषु नियोजितः ।
एकदा तेन राजपुत्रेण स्नातानुलिप्तेन कनकरत्नालङ्कारधारिणा प्रोक्तम्–“अद्यारभ्य मासमेकं गौरीव्रतं कर्तव्यम् । तदत्र प्रतिरात्रमेकां कुलीनां युवतिमानीय समर्पय । सा मया यथोचितेन विधिना पूजयित्वा

।” ततः स चारुदत्तस्तथाविधां नवयुवतीमानीय समर्पयति । पश्चात्प्रच्छन्नः सन्किमयं करोतीति निरूपयति । स च तुङ्गबलस्तां युवतिमस्पृशन्नेव दूरात्स्रद्वालंकारगन्धचन्दनैः संपूज्य रक्षकं दत्त्वा प्रस्थापयति । अथ वणिक्पुत्रेण तद्दृष्ट्वोपजातविश्वासेन लोभाकृष्टमनसा स्ववधूर्लावण्यवती । स च तुङ्गबलस्तां हृदयप्रियां लावण्यवतीं विज्ञाय ससंभ्रममुत्थाय निर्भरमालिङ्ग्य निमीलिताक्षः पर्यङ्के तया सह विललास । तदालोक्य वणिक्पुत्रश्चित्रलिखित इवेति कर्तव्यतामूढः परं विषादमुपगतः ।

अतोऽहं ब्रवीमि—“स्वयं वीक्ष्य” इत्यादि । “तथा त्वयापि भवितव्यम्” इति ।

ततस्तद्धितवचनम् अवधीर्य महता भयेन विमुग्ध इव मन्थरस्स् तज्जलाशयम् उत्सृज्य प्रचलितः । तेऽपि हिरण्यकादयः स्नेहाद् अनिष्टं शङ्कमानास्तम् अनुजग्मुः ।

## १-०७ मन्थरस्य बन्धमोचनम्

ततः स्थले गच्छन् केनापि व्याधेन वने पर्यटता स मन्थरः प्राप्तः । स च तं गृहीत्वा उत्थाय धनुषि बद्ध्वा धन्यो ऽस्मीत्य् अभिधाय भ्रमण-क्लेशात् क्षुत्-पिपासाकुलः स्व-गृहाभिमुखं प्रयातः । अथ ते मृग-वायस-मूषिकाः परं विषादम् उपगताः तम् अनुगच्छन्ति स्म । ततो हिरण्यको विलपति-

एकस्य दुःखस्य न यावद् अन्तं गच्छाम्य् अहं पारम् इवार्णवस्य ।
तावद् द्वितीयं समुपस्थितं मे छिद्रेष्व् अनर्था बहुली-भवन्ति ॥ ।१९३ ॥

स्वभावजं तु यन् मित्रं भाग्येनैवाभिजायते ।
तद्-अकृत्रिम-सौहार्दम् आपत्स्व् अपि न मुञ्चति ॥ ।१९४ ॥

अपि च-

न मातरि न दारेषु न सोदर्ये न चात्मजे ।
विश्वासस् तादृशः पुंसां यादृङ् मित्रे स्वभावजे ॥ ।१९५ ॥

इति मुहुः विचिन्त्य प्राह-अहो मे दुर्दैवम् । यतः-

स्व-कर्म-सन्तान-विचेष्टितानि
कालान्तरावर्ति-शुभाशुभानि ।
इहैव दृष्टानि मयैव तानि
जन्मान्तराणीव दशान्तराणि ॥ ।१९६ ॥

अथवा इत्थम् एवैतत् ।

कायः सन्निहितापायः सम्पदः पदम् आपदाम् ।
समागमाः सापगमाः सर्वम् उत्पादि भङ्गुरम् ॥ ।१९७ ॥

पुनः विमृश्याह-

शोकाराति-भय-त्राणं प्रीति-विश्रम्भ-भाजनम् ।
केन रत्नम् इदं सृष्टं मित्रम् इत्य् अक्षर-द्वयम् ॥ ।१९८ ॥

किं च-

मित्रं प्रीति-रसायनं नयनयोः आनन्दनं चेतसः
पात्रं यत् सुख-दुःखयोः समम् इदं पुण्यात्मना लभ्यते ।
ये चान्ये सुहृदः समृद्धि-समये द्रव्याभिलाषाकुलास्
ते सर्वत्र मिलन्ति तत्त्व-निकष-ग्रावा तु तेषां विपत् ॥ ।१९९ ॥

इति बहु विलप्य हिरण्यकश् चित्राङ्ग-लघुपतनकावाह-यावद् अयं व्याधो वनान्न निःसरति, तावन् मन्थरं मोचयितुं यत्नः क्रियताम् ।

ताव् ऊचतुः-सत्वरं यथा-कार्यम् उपदिश ।

हिरण्यको ब्रूते-चित्राङ्गो जल-समीपं गत्वा मृतम् इवात्मानं निश्चेष्टं दर्शयतु । काकश्च तस्योपरि स्थित्वा चञ्च्वा किम् अपि विलिखतु । नूनम् अनेन लुब्धकेन मृग-मांसार्थिना तत्र कच्छपं परित्यज्य सर्वरं गन्तव्यम् । ततो ऽहं मन्थरस्य बन्धनं छेत्स्यामि । सन्निहिते लुब्धके भवद्भ्यां पलायितव्यम् ।

ततश् चित्राङ्ग-लघुपतनकाभ्यां शीघ्रं गत्वा तथानुष्ठिते सति स व्याधः परिश्रान्तः पानीयं पीत्वा तरोः अधस्ताद् उपविष्टः सन् तथाविधं मृगम् अपश्यत् । ततः कच्छपं जल-समीपे निधाय कर्तरिकाम् आदाय प्रहृष्ट-मना मृगान्तिकं चलितः । अत्रान्तरे हिरण्यकेन आगत्य मन्थरस्य बन्धनं छिन्नम् । छिन्न-बन्धनः कूर्मः सत्वरं जलाशयं प्रविष्टः । स च मृग आसन्नं तं व्याधं विलोक्योत्थाय द्रुतं पलायितः । प्रत्यावृत्त्य लुब्धको यावत् तरुतलम् आयाति तावत् कूर्मम् अपश्यन्न् अचिन्तयत्- उचितम् एवैतत् ममासमीक्ष्यकारिणः । यतः-

यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टम् एव हि ॥ ।२०० ॥

ततोऽसौ स्वकर्मवशान् निराशः कटकं प्रविष्टः । मन्थरादयश्च सर्वे मुक्तापदः स्व-स्थानं गत्वा यथासुखम् आस्थिताः ।

अथ राजपुत्रैः सानन्दम् उक्तम्-सर्वे श्रुतवन्तः सुखिनो वयम् । सिद्धं नः समीहितम् ।

विष्णु-शर्मोवाच-एतद् भवताम् अभिलषितम् अपि सम्पन्नम् । अपरमपीदम् अस्तु-

मित्रं यान्तु च सज्जना जनपदैः लक्ष्मीः समालभ्यतां
भूपालाः परिपालयन्तु वसुधां शश्वत् स्व-धर्मे स्थिताः ।
आस्तां मानस-तुष्टये सुकृतिनां नीतिः नवोढेव वः
कल्याणं कुरुतां जनस्य भगवांश्चन्द्रार्ध-चूडामणिः ॥ ।२०१ ॥

# सुहृद्भेदः

## २-०० वर्धमानकथा

अथ राज-पुत्रा ऊचुः-आर्य ! मित्रलाभः श्रुतस् तावद् अस्माभिः । इदानीं सुहृद्भेदं श्रोतुम् इच्छामः ।

विष्णुशर्मोवाच-सुहृद्-भेदं तावच्छृणुत, यस्यायम् आद्यः श्लोकः-

वर्धमानो महान् स्नेहो मृगेन्द्र-वृषयोः वने ।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः ॥ २।१ ॥

राजपुत्रैरुक्तम् -कथम् एतत् ?

विष्णुशर्मा कथयति-अस्ति दक्षिणा-पथे सुवर्णवती नाम नगरी । तत्र वर्धमानो नाम वणिग् निवसति । तस्य प्रचुरेऽपि वित्तेऽ परान् बन्धून् अतिसमृद्धान् समीक्ष्य पुनः अर्थ-वृद्धिः करणीयेति मतिः बभूव । यतः,

अधो ऽधः पश्यतः कस्य महिमा नोपचीयते ।
उपर्य् उपरि पश्यन्तः सर्व एव दरिद्रति ॥ २।२ ॥

अपरं च-

ब्रह्महापि नरः पूज्यो यस्यास्ति विपुलं धनम् ।
शशिनस् तुल्य-वंशो ऽपि निर्धनः परिभूयते ॥ २।३ ॥

अन्यच्च-

अव्यवसायिनम् अलसं दैव-परं सहसाच्च परिहीणम् ।
प्रमदेव हि वृद्ध-पतिं नेच्छत्य् अवगूहितुं लक्ष्मीः ॥ २।४ ॥

किं च-
आलस्यं स्त्री-सेवा स-रोगता जन्म-भूमि-वात्सल्यम् ।
सन्तोषो भीरुत्वं षड् व्याघाता महत्त्वस्य ॥ २।५ ॥

यतः-
सम्पदा सुस्थिरं-मन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिः मन्ये न वर्धयति तस्य ताम् ॥ २।६ ॥

अपरं च-
निरुत्साहं निरानन्दं निर्वीर्यम् अरि-नन्दनम् ।
मा स्म सीमन्तिनी काचिज् जनयेत् पुत्रम् ईदृशम् ॥ २।७ ॥

तथा चोक्तम्-
अलब्धं चैव लिप्सेत लब्धं रक्षेत् प्रयत्नतः ।
रक्षितं वर्धयेच् चैव वृद्धं पात्रेषु निक्षिपेत् ॥ २।८ ॥

यतो ऽलब्धम् इच्छतो ऽर्थ-योगाद् अर्थस्य प्राप्तिः एव । लब्धस्याप्य् अरक्षितस्य निधेः अपि स्वयं विनाशः । अपि च, अवर्धमानश् चार्थः काले स्वल्प-व्ययो ऽप्य् अञ्जनवत् क्षयम् एति । नौपभुज्यमानश्च निष्प्रयोजन एव सः । तथा चोक्तम्-

धनेन किं यो न ददाति नाश्नुते

बलेन किं यश्च रिपून्न बाधते ।
श्रुतेन किं यो न च धर्मम् आचरेत्
किम् आत्मना यो न जितेन्द्रियो भवेत् ॥ २।९ ॥

यतः,
जल-बिन्दु-निपातेन क्रमशः पूर्यते घटः ।
स हेतुः सर्व-विद्यानां धर्मस्य च धनस्य च ॥ २।१० ॥

दानोपभोग-रहिता दिवसा यस्य यान्ति वै ।
स कर्म-कार-भस्त्रेव श्वसन्न् अपि न जीवति ॥ २।११ ॥

इति सञ्चिन्त्य नन्दक-सजीवक-नामानौ वृषभौ धुरि नियोज्य शकटं नानाविध-द्रव्य-पूर्णं कृत्वा वाणिज्येन गतः कश्मीरं प्रति । अन्यच्च-

अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य च सञ्चयम् ।
अवन्ध्यं दिवसं कुर्याद् दानाध्ययन-कर्मभिः ॥ २।१२ ॥

यतः-

को ऽतिभारः समर्थानां किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां कः परः प्रिय-वादिनाम् ॥ २।१३ ॥

अथ गच्छतस् तस्य सुदुर्ग-नाम्नि महारण्ये सञ्जीवको भग्न-जानुः निपतितः । तम् आलोक्य वर्धमानो ऽचिन्तयत्-

करोतु नाम नीति-ज्ञो व्यवसायम् इतस् ततः ।
फलं पुनस् तद् एव स्याद् यद् विधेः मनसि स्थितम् ॥ २।१४ ॥

किन्तु-

विस्मयः सर्वथा हेयः प्रत्यूहः सर्व-कर्मणाम् ।
तस्माद् विस्मयम् उत्सृज्य साध्ये सिद्धिः विधीयताम् ॥ २।१५ ॥

इति सञ्चिन्त्य सञ्जीवकं तत्र परित्यज्य वर्धमानः पुनः स्वयं धर्मपुरं नाम नगरं गत्वा महाकायम् अन्यं वृषभम् एकं समानीय धुरि नियोज्य चलितः ।

## २-०१ पिङ्गलकभीतिः

ततः सञ्जीवको ऽपि कथं कथम् अपि खुर-त्रये भरं कृत्वोत्थितः । यतः-
निमग्नस्य पयो-राशौ पर्वतात् पतितस्य च ।
तक्षकेणापि दष्टस्य आयुः मर्माणि रक्षति ॥ २।१६ ॥
नाकाले म्रियते जन्तुः विद्धः शर-शतैः अपि ।
कुशाग्रेणैव संस्पृष्टः प्राप्त-कालो न जीवति ॥ २।१७ ॥
अरक्षितं तिष्ठति दैव-रक्षितं
सुरक्षितं दैव-हतं विनश्यति ।
जीवत्य अनाथो ऽपि वने विसर्जितः
कृत-प्रयत्नो ऽपि गृहे न जीवति ॥ २।१८ ॥

ततो दिनेषु गच्छत्सु सञ्जीवकः स्वेच्छाहार-विहारं कृत्वारण्यं भ्राम्यन् हृष्ट-पुष्टाङ्गो बलवन्ननाद । तस्मिन् वने पिङ्गलक-नामा सिंहः स्व-भुजोपार्जित-राज्य-सुखम् अनुभवन् निवसति । तथा चोक्तम्-

नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः ।
विक्रमार्जित-राज्यस्य स्वयम् एव मृगेन्द्रता ॥ २।१९ ॥

स चैकदा पिपासाकुलितः पानीयं पातुं यमुना-कच्छम् अगच्छत् । तेन च तत्र सिंहेनाननुभूत-पूर्वकम् अकाल-घन-गर्जितम् इव सञ्जीवक-नर्दितम् अश्रावि । तच् छ्रुत्वा पानीयम् अपीत्वा स-चकितः परिवृत्य स्व-स्थानम् आगत्य किम् इदम् इत्यालोचयंस् तूष्णीं स्थितः । स च तथाविधः करट-कदमनकाभ्याम् अस्य मन्त्रि-पुत्राभ्यां दृष्टः । तं तथाविधं दृष्ट्वा दमनकः करटकम् आह-सखे करटक ! किम् इत्य् अयम् उदकार्थी स्वामी पानीयम् अपीत्वा सचकितो मन्दं मन्दम् अवतिष्ठते ।

## २-०२ दमनककरटकयोः संवादः

करटको ब्रूते-मित्र दमनक ! अस्मन्-मतेनास्य सेवैव न क्रियते । यदि तथा भवति तर्हि किम् अनेन स्वामि-चेष्टानिरूपेणास्माकम् । यतोऽनेन राज्ञा विनापराधेन चिरम् अवधीरिताभ्याम् आवाभ्यां महद्-दुःखम् अनुभूतम् ।

सेवया धनम् इच्छद्भिः सेवकैः पश्य यत् कृतम् ।
स्वातन्त्र्यं यच् छरीरस्य मूढैस् तद् अपि हारितम् ॥ २।२० ॥

अपरं च-

शीत-वातातप-क्लेशान् सहन्ते यान् पराश्रिताः ।
तद्-अंशेनापि मेधावी तपस् तप्त्वा सुखी भवेत् ॥ २।२१ ॥

अन्यच्च-

एतावज् जन्मसाफल्यं देहिनाम् इह देहिषु ।

प्राणैः अर्थैः धिया वाचा श्रेय एवाचरेत् सदा ॥ २।२२ ॥

अपरं च-

एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।

इति वित्रस्त-सारङ्ग-नेत्रया को न वञ्चितः ॥ २।२३ ॥

अपरं च-

एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।

इति वित्रस्त-सारङ्ग-नेत्रया को न वञ्चितः ॥ २।२३ ॥

किं च-

अबुधैः अर्थ-लाभाय पण्य-स्त्रीभिः इव स्वयम् ।

आत्मा संस्कृत्य संस्कृत्य परोपकरणी-कृतः ॥ २।२४ ॥

किं च-

या प्रकृत्यैव चपला निपतत्य् अशुचावपि ।

स्वामिनो बहु मन्यन्ते दृष्टिं ताम् अपि सेवकाः ॥ २।२५ ॥

अपरं च-

मौनान् मूर्खः प्रवचन-पटुः बातुलो जल्पको वा

क्षान्त्या भीरुः यदि न सहते प्रायशो नाभिजातः ।

धृष्टः पार्श्वे वसति नियतं दूरतश् चाप्रगल्भः

सेवा-धर्मः परम-गहनो योगिनाम् अप्य् अगम्यः ॥ २।२६ ॥

विशेषतश्च-

प्रणमत्युन्नति-हेतोः जीवित-हेतोः विमुञ्चति प्राणान् ।
दुःखीयति सुख-हेतोः को मूढः सेवकाद् अन्यः ॥ २।२७ ॥

दमनको ब्रूते-मि त्र सर्वथा मनसापि नैतत् कर्तव्यम्, यतः-

कथं नाम न सेव्यन्ते यत्नतः परमेश्वराः ।
अचिरेणैव ये तुष्टाः पूरयन्ति मनोरथान् ॥ २।२८ ॥

अन्यच्च-

कुतः सेवा-विहीनानां चामरोद्धूत-सम्पदः ।
उद्दण्ड-धवल-च्छत्रं वाजि-वारण-वाहिनी ॥ २।२९ ॥

करटको ब्रूते- तथापि किम् अनेनास्माकं व्यापारेण । यतो ऽव्यापारेषु व्यापारः सर्वथा परिहरणीयः ।

पश्य-

अव्यापरेषु व्यापारं यो नरः कर्तुम् इच्छति ।
स एव निधनं याति कीलोत्पटीव वानरः ॥ २।३० ॥

दमनकः पृच्छति–कथम् एतत् ?

करकटः कथयति-

## ०२-०१ कीलाभिहतमर्कटः

अव्यापरेषु व्यापारं यो नरः कर्तुम् इच्छति ।
स एव निधनं याति कीलोत्पटीव वानरः ॥ २।३० ॥

अस्ति मगधदेशे धर्मारण्य-सन्निहित-वसुधायां शुभदत्त-नाम्ना कायस्थेन विहारः कर्तुम् आरब्धः । तत्र करपत्रदार्य-माणैक-स्तम्भस्य कियद् दूरस्फाटितस्य काष्ठ-खण्ड-द्वय-मध्ये कीलकः सूत्र-धारेण निहितः । तत्र बलवान् वानर-यूथः क्रीडन्न् आगतः । एको वानरः काल-प्रेरित इव तं कीलकं हस्ताभ्यां धृत्वोपविष्टम् । अनन्तरं स च सहज-चपलतया महता प्रयत्नेन तं कीलकम् आकृष्टवान् । आकृष्टे च कीलके चूर्णिताण्ड-द्वयः पञ्चत्वं गतः ।

अतो ऽहं ब्रवीमि-अव्यापरेषु व्यापारम् इत्यादि ।

दमनको ब्रूते-तथापि स्वामि-चेष्टा-निरूपणं सेवकेनावश्यं करणीयम् ।

करटको ब्रूते-सर्वस्मिन्न् अधिकारे य एव नियुक्तः प्रधान-मन्त्री स करोतु । यतो ऽनुजीविना पराधिकार-चर्चा सर्वथा न कर्तव्या । पश्य-

पराधिकार-चर्चां यः कुर्यात् स्वामि-हितेच्छया ।

स विषीदति चीत्काराद् गर्दभस्ताडितो यथा ॥ २।३१ ॥

## सारांशः

अस्मिन् खण्डे हिरण्यकस्य पूर्वकथा भवति । चम्पकवती नगरे सन्न्यासिनां वासस्थाने चूडाकर्णः नाम सन्न्यासी आसीत् । प्रतिदिनं रात्रौ अन्नं भिक्षापात्रे स्थापयित्वा निद्रार्थं गच्छति स्म सः । तदेव भक्षणं करोति हिरण्यकः । एकदा चूडाकर्णं द्रष्टुं मित्रं वीणाकर्णः समागतः । तेन सह वार्तालापे जाते तदा हिरण्यकं दृष्ट्वा चूडाकर्णः एकेन दण्डेन भूमौ हिरण्यकं भाययितुं ताडितवान् । तद्दृष्ट्वा कुपितः सः वीणाकर्णः मित्रयोः द्वयोः भाषणे अवधानं नास्ति चेत् तस्य इच्छा नास्ति इत्यर्थः इति उवाच । ततः परं चित्रकर्णः अवोचत् तथा नास्ति अयं मूषिकः प्रतिदिनं मया दत्तम् अन्नं भुङ्क्त्वैव निवसतीति । ततःपरं सः हिरण्यकस्य गृहं छित्वा तत्रत्यान् द्रव्यान् सर्वान् अपहृत्य उक्तवान् द्रव्यम् नास्ति चेत् अबलः जातः इति ।

ततः परं तत् गृहं त्यक्त्वा इतः ततः अटित्वा अत्र समागतःअस्मि इति स्वकथां श्रावयामास हिरण्यकः ।

एतच्छ्रुत्वा मन्थरः लोभात् अधिकद्रव्यसंपादनाय नष्टस्य श्रृगालस्य कथां श्रावयामास।

तथाहि – कल्याणकटकनाम्नि जगारे भैरवो नाम व्याधः आसीत् । सः कदाचित् मृगं हत्वा गृहं नयति स्म। मार्गे विचित्ररूपधृक् वराहं दृष्ट्वा मृगं स्थापयित्वा तमपि बाणेन ताडयामास। सः वराहः भूमौ पतितः। तं नेतुम् उद्यतः व्याधोपि अकस्मात् वराहस्य प्रहारेण पतितः मृतश्च। तस्मिन् समये एकः सर्पोपि मृतः। एतच्चतुष्टयं मृतं दृष्ट्वा तत्र आगतः श्रृगालः दीर्घरावनामकः अत्यन्तं सन्तुष्टः मासत्रस्य भोजनं लब्धमिति मत्वा लोभात् रज्जुं खादितवान् तदानीम् धनुष्काण्डम् उत्थाय श्रृगालस्य हृदयम् अभिनत् । ततः श्रृगालोपि मृतः। अतः अधिकद्रव्यसंपादनं न कर्तव्यमिति उपदिदेश मन्थरः।

ततः परं काले गते तत्र चित्राङ्गो नाम मृगः भीतः सन् कस्माच्चित देशात् समागतः। तस्य राज्यपदवीं दत्तवन्तः हिरण्यकादयः। ततः मन्थरः पृच्छति किमर्थं भवतां भीतिः । मृगः उत्तरयति – श्वः कलिङ्गराजा अत्र आगमिष्यतीति व्याधः अवादीदिति ।

तच्छ्रुत्वा भीताः सर्वे एतत् कूपं त्यक्त्वा अन्यत्र गताः। तदानीं व्याधः एनम्मन्थरन्नीत्वा गतः तज्ज्ञात्वा दुःखिताः सर्वेपि एकमुपायं कृत्वा तं रक्षितवन्तः इति मित्राणां प्रशंसा कृता विष्णुशर्मणा राजपुत्राणां कृते । तज्ज्ञात्वा तेपि धन्याः वयम् इति अचिन्तयन् ।

ततः परम् अस्मिन् खण्डे सुहृद्भेदोपि वर्णितः। तत्र कथाद्वयम् भवति । एका कथा भवति सिंहस्य वृषभेन सह मैत्री आसीत् सा श्रृगालेन नष्टा इति । इयमेव कथा भवति प्रधानकथा अस्य भागस्य तत्प्रसङ्गात् करटकनामकश्रृगालेन कपेः कथापि प्रोक्ता भवति इति अस्य खण्डस्य सारो भवति।।

**बोधप्रश्नाः**

1. कर्पूरतिलकः इति नाम कस्य ?
2. कान्यकुब्जदेशाधिपतिः कः?
3. गौरीव्रतं कर्तव्यमिति केन उक्तम्?
4. वर्धमानः कस्मिन् देशे निवसति?
5. मन्त्रिपुत्रौ कौ?

**शब्दावली**

1. वीरसेनः

2. कर्पूरतिलकः
3. गौरीव्रतम्
4. दमनकः
5. पिङ्गलकः
6. करटकः
7. संजीवकः

**सन्दर्भग्रन्थः -**

1. हितोपदेशम् – मूलमात्रम्, श्रीलक्ष्मीनारायणमुद्रालयः, बंबई- 1918.

**सहायकग्रन्थाः –**

1. हितोपदेशम् – Commentary by - पण्डित रामेश्वरभट्ट, निर्णयसागरप्रेस, बंबाई-1941.
2. हितोपदेशम्- Commentary by M.R.Kale, Motilal Banarsi Das,Varanasi,1976.

**बोधप्रश्नोत्तराणि –**

1. गजस्य
2. वीरसेनः
3. कनकरत्नालङ्कारधारिणा राजपुत्रेण
4. सुवर्णवती
5. करटकदमनकौ

**अभ्यासप्रश्नाः**

1. अस्मिन् खण्डे कथिताः सर्वे श्लोकाः कण्ठस्थिकर्तव्याः
2. पञ्चकथानां परिचयं कुरुत
3. मित्रलाभस्थान् विशेषान् चित्वा प्रबन्धमेकं लिखत

# खण्डः ५

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलपाठः
- सारांशः
- बोधप्रश्नाः
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

अस्मिन् खण्डे सुहृद्भेदस्य प्रसङ्गः भवति । अत्र बह्व्यः कथाः पाठ्यन्ते तत्रापि अनेकाः नीतयश्च बुध्यन्ते । तत्र आदौ श्वानगर्दभकथा भवति । तत्र अन्येषां कार्ये स्वीयवाग्व्यारः न कार्यः इति नीतिः बुध्यते । तथा न क्रियते चेत् गर्दभः यथा रजकेन नष्टः तद्वद् नष्टो भवति इति बोधयति कथा ।ततः परं दमनककरटकौ कथं सिंहराजानं पलायितवन्तौ इति संवाद् रूपेण पाठः भवति । तत्रैव दमनककरटकयोः संवादोपि प्रतिपादितः नीतिद्योतनाय । ततः परं दुर्दान्तो नाम महाविक्रमः सिम्हः आसीत्, तस्य कथा श्राविता । तत्र स्वामी भृत्यैः निरपेक्षो न कर्तव्यः इति नीतिः अवगन्तव्या । ततः घण्टाकर्णस्य कथा भवति । तत्र च केवलवचनात् अज्ञात्वा न भेतव्यमिति नीतिः परिस्फुरति । ततः परं वीरविक्रमस्य कथा भवति, तत्र च दोषः आत्मकृतश्चेदपि परिवेदनमनुचितमिति नीतिः ज्ञायते । अनन्तरं बन्धक्याः कथा । तत्र स्त्रीणां माहात्म्यमुपवर्णितम् । ततः  वायसदम्पत्योः कथा भवति तत्र हि उपायेन यच्छक्यं तदेव शक्यं नतु पराक्रमैः तच्छक्यम् इति । ततः बुद्धिरेव सर्वतो बलवती इति द्योतनाय सिंहकथा आगता । एवमेव

अन्ते टिट्टिभदंपती कथा आगच्छति । तत्र सामर्थ्यनिर्णयः अङ्गाङ्गिभावमज्ञात्वा न कर्तव्य इति ज्ञानं संपद्यते । एवं क्रमेण सुहृद्भेदस्य प्रधानकथां समापयति विष्णुशर्मा ।

**उद्देश्यम्**

- सुहृदां मध्ये कीदृशी भावना भवेदिति ज्ञानं भवति
- अन्येषां कार्ये स्वीयवाग्व्यारः न कार्यः इति नीतिः बुध्यते
- भृत्यधर्मः, स्वामिधर्मः च ज्ञायते
- विभिन्नधातूनां शब्दानां परिचयो भवति
- विभिन्नदेशानां परिचयो भवति

दमनकः पृच्छति–कथम् एतत् ?

करटको ब्रूते-

## ०२-०२ श्वानगर्दभकथा

अस्ति वाराणस्यां कर्पूरपटको नाम रजकः । स रात्रौ गाढनिद्रायां प्रसुप्तः । तदनन्तरं तद्-गृह-द्रव्याणि हर्तुं चौरः प्रविष्टः । तस्य प्राङ्गणे गर्दभो बद्धस् तिष्ठति । कुक्कुरश् चोपविष्टो ऽस्ति । अथ गर्दभः श्वानम् आह-सखे ! भवतस् तावद् अयं व्यापारः । तत् किम् इति त्वम् उच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि ।

कुक्कुरो ब्रूते- भद्र ! मम नियोगस्य चर्चा त्वया न कर्तव्या । त्वम् एव किं न जानासि यथा तस्याहर्निशं गृह-रक्षां करोमि । यतो ऽयं चिरान् निर्वृतो ममोपयोगं न जानाति । तेनाधुनापि ममाहार-दाने मन्दादरः । यतो विना विधुर-दर्शनं स्वामिन उपजीविषु मन्दादरा भवन्ति ।

गर्दभो ब्रूते- शृणु रे बर्बर ! याचते कार्यकाले यः स किंभृत्यः स किंसुहृत् ।

कुक्कुरो ब्रूते-

भृत्यान् सम्भाषयेद् यस्तु कार्य-काले स किं-प्रभुः ॥ २।३२ ॥

यतः-

आश्रितानां भृतौ स्वामि-सेवायां धर्म-सेवने ।
पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः ॥ २।३३ ॥

ततो गर्दभः स-कोपम् आह-अरे दुष्ट-मते ! पापीयांस् त्वं यद् विपत्तौ स्वामि-कार्ये उपेक्षां करोषि । भवतु तावत् । यथा स्वामी जागरिष्यति, तन् मया कर्तव्यम् । यतः-

पृष्ठतः सेवयेद् अर्कं जठरेण हुताशनम् ।
स्वामिनं सर्व-भावेन परलोकम् अमायया ॥ २।३४ ॥

इत्युक्त्वातीव चीत्कारशब्दं कृतवान् । ततः स रजकस् तेन चीत्कारेण प्रबुद्धो निद्रा-भङ्ग-कोपाद् उत्थाय गर्दभं लगुडेन तादयामास । तेनासौ पञ्चत्वम् अगमत् ।

अतो ऽहं ब्रवीमि-पराधिकार-चर्चाम् इत्यादि । पश्य, पशूनाम् अन्वेषणम् एवास्मन्-नियोगः । स्व-नियोग-चर्चा क्रियताम् । किन्त्व् अद्य तया चर्चया न प्रयोजनम् । यत आवयोः भक्षित-शेषाहारः प्रचुरो ऽस्ति ।

दमनकः सरोषम् आह-कथम् आहारार्थी भवान् केवलं राजानं सेवते ? एतद् अयुक्तम् उक्तं त्वया । यतः-

सुहृदाम् उपकार-कारणाद्
द्विषताम् अप्य् अपकार-कारणात् ।
नृप-संश्रय इष्यते बुधैः
जठरं को न बिभर्ति केवलम् ॥ २।३५ ॥

जीविते यस्य जीवन्ति विप्रा मित्राणि बान्धवाः ।
सफलं जीवितं तस्य आत्मार्थे को न जीवति ॥ २।३६ ॥

अपि च-

यस्मिन् जीवति जीवन्ति बहवः स तु जीवतु ।
काको ऽपि किं न कुरुते चञ्च्वा स्वोदर-पूरणम् ॥ २।३७ ॥

पश्य-

पञ्चभिः याति दासत्वं पुराणैः को ऽपि मानवः ।
को ऽपि लक्षैः कृती को ऽपि लक्षैः अपि न लभ्यते ॥ २।३८ ॥

अन्यच्च-

मनुष्य-जातौ तुल्यायां भृत्यत्वम् अति-गर्हितम् ।
प्रथमो यो न तन् नापि स किं जीवत्सु गण्यते ॥ २।३९ ॥

तथा चोक्तं-

वाजि-वारण-लोहानां काष्ठ-पाषाण-वाससाम् ।
नारी-पुरुष-तोयानाम् अन्तरं हद-हन्तरम् ॥ २।४० ॥

तथा हि स्वल्पम् अप्य् अतिरिच्यते-

स्वल्प-स्नायु-वसावशेष-मलिनं निर्मांसम् अप्य् अस्थिकं
श्वा लब्ध्वा परितोषम् एति न भवेत् तस्य क्षुधः शान्तये ।
सिंहो जम्बुकम् अङ्कम् आगतम् अपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्र-गतो ऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥ २।४१ ॥

अपरं च, सेव्य-सेवकयोः अन्तरं पश्य-

लाङ्गूल-चालनम् अधश्चरणावपातं
भूमौ निपत्य वदनोदर-दर्शनं च ।
श्वा पिण्डदस्य कुरुते गज-पुङ्गवस् तु
धीरं विलोकयति चाटु-शतैश्च भुङ्क्ते ॥ २।४२ ॥

किं च-
यज् जीव्यते क्षणम् अपि प्रथितं मनुष्यैः
विज्ञान-विक्रम-यशोभिः अभज्यमानम् ।
तन् नाम जीवितम् इह प्रवदन्ति तज्-ज्ञाः
काकोऽपि जीवति चिराय बलिं च भुङ्क्ते ॥ २।४३ ॥

अपरं च-

यो नात्मजे न च गुरौ न च भृत्य-वर्गे
दीने दयां न कुरुते न च बन्धु-वर्गे ।
किं तस्य जीवित-फलेन मनुष्य-लोके
काको ऽपि जीवति चिराय बलिं च भुङ्क्ते ॥ २।४४ ॥

अपरम् अपि-

अहित-हित-विचार-शून्य-बुद्धेः
श्रुति-समयैः बहुभिः बहिष्कृतस्य ।
उदर-भरण-मात्र-केवलेच्छोः
पुरुष-पशोश्च पशोश्च को विशेषः ॥ २।४५ ॥

करटको ब्रूते-आवां तावद् अप्रधानौ । तदाप्य् आवयोः किम् अनया विचारणया ।

दमनको ब्रूते-कियता कालेनामात्याः प्रधानताम् अप्रधानतां वा लभन्ते, यतः-

न कस्यचित् कश्चिद् इह स्वभावाद्
भवत्युदारो ऽभिमतः खलो वा ।
लोके गुरुत्वं विपरीततां वा
स्व-चेष्टितान्य् एव नरं नयन्ति ॥ २।४६ ॥

किं च-

आरोप्यते शिला शैले यत्नेन महता यथा ।

निपात्यते क्षणेनाधस् तथात्मा गुण-दोषयोः ॥ २।४७ ॥

यात्य् अधो ऽधः व्रजत्युच्चैः नरः स्वैः एव कर्मभिः ।

कूपस्य खनिता यद्वत् प्राकारस्येव कारकः ॥ २।४८ ॥

तद् भद्रम् । स्वयत्नायत्तो ह्य् आत्मा सर्वस्य ।

करटको ब्रूते-अथ भवान् किं ब्रवीति ?

स आह-अयं तावत् स्वामी पिङ्गलकः कुतो ऽपि कारणात् स-चकितः परिवृत्योपविष्टः ।

करटको ब्रूते-

"किं तत्त्वं जानासि?" । दमनको ब्रूते किमत्राविदितमस्ति ?

उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति चोदिताः ।

अनुक्तम् अप्य् ऊहति पण्डितो जनः परेङ्गित-ज्ञान-फला हि बुद्धयः ॥ २।४९ ॥

आकार-रिङ्गतैः गत्या चेष्टया भाषणेन च ।

नेत्र-वक्त्र-विकारेण लक्ष्यतेऽन्तर्गतं मनः ॥ २।५० ॥

अत्र भयप्रस्तावे प्रज्ञा-बलेनाहम् एनं स्वामिनम् आत्मीयं करिष्यामि । यतः-

प्रस्ताव-सदृशं वाक्यं सद्-भाव-सदृशं प्रियम् ।
आत्म-शक्ति-समं कोपं यो जानाति स पण्डितः ॥ २।५१ ॥

करटको ब्रूते- सखे त्वं सेवानभिज्ञः । पश्य-

अनाहूतो विशेद् यस् तु अपृष्टो बहु भाषते ।
आत्मानं मन्यते प्रीतं भू-पालस्य स दुर्मतिः ॥ २।५२ ॥

दमनको ब्रूते- भद्र ! कथम् अहं सेवानभिज्ञः ? पश्य-

किम् अप्य् अस्ति स्वभावेन सुन्दरं वाप्य् असुन्दरम् ।
यद् एव रोचते यस्मै भवेत् तत् तस्य सुन्दरम् ॥ २।५३ ॥

यतः-

यस्य यस्य हि यो भावस् तेन तेन हि तं नरम् ।
अनुप्रविश्य मेधावी क्षिप्रम् आत्म-वशं नयेत् ॥ २।५४ ॥

अन्यच्च-

कोऽत्रेत्यहम् इति ब्रूयात् सम्यग् आदेशयेति च ।
आज्ञाम् अवितथां कुर्याद् यथा-शक्ति महीपतेः ॥ २।५५ ॥

अपरं च-

अल्पेच्छुः धृतिमान् प्राज्ञश् छायेवानुगतः सदा ।
आदिष्टो न विकल्पेत स राज-वसतिं वसेत् ॥ २।५६ ॥

करटको ब्रूते- कदाचित् त्वाम् अनवसर-प्रवेशाद् अवगम्यते स्वामी ।

स चाह-अस्त्वेवम् । तथाप्यनुजीविना स्वामिसान्निध्यम् अवश्यं करणीयम् ।

यतः-

दोष-भीतेः अनारम्भस् तत् कापुरुष-लक्षणम् ।
कैः अजीर्ण-भयाद् भ्रातः भोजनं परिहीयते ॥ २।५७ ॥

पश्य-
आसन्नम् एव नृपतिः भजते मनुष्यं विद्या-विहीनम् अकुलीनम् असंस्तुतं वा ।
प्रायेण भूमि-पतयः प्रमदा-लताश्च यः पार्श्वतो वसति तं परिवेष्टयन्ति ॥ २।५८ ॥

करटको ब्रूते- अथ तत्र गत्वा किं वक्ष्यति भवान् ।

स आह- श्रृणु ! किम् अनुरक्तो विरक्तो वा मयि स्वामीति ज्ञास्यामि ।

करटको ब्रूते- किं तज् ज्ञान-लक्षणम् ।

दमनको ब्रूते- श्रृणु-

दूराद् अवेक्षणं हासः सम्प्रश्नेष्व् आदरो भृशम् ।
परोक्षेऽपि गुण-श्लाघा स्मरणं प्रिय-वस्तुषु ॥ २।५९ ॥

असेवके चानुरक्तिः दानं स-प्रिय-भाषणम् ।
अनुरक्तस्य चिह्नानि दोषेऽपि गुण-सङ्ग्रहः ॥ २।६० ॥

अन्यच्च–
काल-यापनम् आशानां वर्धनं फल-खण्डनम् ।
विरक्तेश्वर-चिह्नानि जानीयान् मतिमान्नरः ॥ २।६१ ॥

एतज् ज्ञात्वा यथा चायं ममायत्तो भविष्यति । तथा वदिष्यामि ।

अपायसं दर्शनजां विपत्तिम्
उपाय-सन्दर्शन-जां च सिद्धिम् ।
मेधाविनो नीति-विधि-प्रयुक्तां
पुरः स्फुरन्तीम् इव दर्शयन्ति ॥ २।६२ ॥

करटको ब्रूते-तथाप्य् अप्राप्ते प्रस्तावे न वक्तुम् अर्हसि, यतः-

अप्राप्त-कालं वचनं बृहस्पतिः अपि ब्रुवन् ।
लभते बुद्ध्य्-अवज्ञानम् अवमानं च भारत ॥ २।६३ ॥

दमनको ब्रूते-मित्र ! मा भैषीः ! नाहम् अप्राप्तावसरं वचनं वदिष्यामि । यतः-

आपद्य् उन्मार्ग-गमने कार्य-कालात्ययेषु च ।
अपृष्टो ऽपि हितान्वेषी ब्रूयात् कल्याण-भाषितम् ॥ २।६४ ॥

यदि च प्राप्तावसरेणापि मया मन्त्रो न वक्तव्यस् तदा मन्त्रित्वम् एव ममानुपपन्नम् । यतः-

कल्पयति येन वृत्तिं येन च लोके प्रशस्यते ।
स गुणस् तेन गुणिना रक्ष्यः संवर्धनीयश्च ॥ २।६५ ॥
तद् भद्र ! अनुजानीहि माम् । गच्छामि ।
करटको ब्रूते-शुभम् अस्तु । शिवास् ते पन्थानः । यथाभिलषितम् अनुष्ठीयताम् इति ।

## २-०३ पिङ्गलकदमनकयोः संवादः

ततो दमनको विस्मित इव पिङ्गलक-समीपं गतः । अथ दूराद् एव सादरं राज्ञा प्रवेशितः साष्टाङ्ग-प्रणिपातं प्रणिपत्योपविष्टः । राजाह-चिराद् दृष्टो ऽसि ।

दमनको ब्रूते- यद्यपि मया सेवकेन श्रीमद्-देवपादानां न किञ्चित् प्रयोजनम् अस्ति, तथापि प्राप्त-कालम् अनुजीविना सान्निध्यम् अवश्यं कर्तव्यम् इत्यागतो ऽस्मि । किं च-

दन्तस्य निर्घर्षणकेन राजन्
कर्णस्य कण्डूयनकेन वापि ।
तृणेन कार्यं भवतीश्वराणां
किम् अङ्ग-वाक्-पाणि-मता नरेण ॥ २।६६ ॥

यद्यपि चिरेणावधीरितस्य देव-पादैः मे बुद्धि-नाशः शक्यते, तद् अपि न शङ्कनीयम् । यतः-

कदर्थितस्यापि च धैर्यवृत्तेः
बुद्धेः विनाशो नहि शङ्कनीयः ।
अधः-कृतस्यापि तनूनपातो
नाधः शिखा याति कदाचिद् एव ॥ २।६७ ॥

देव ! तत् सर्वथा विशेषज्ञेन स्वामिना भवितव्यम् । यतः-
मणिः लुठति पादेषु काचः शिरसि धार्यते ।
यथैवास्ते तथैवास्तां काचः काचो मणिः मणिः ॥ २।६८ ॥
अन्यच्च-
निर्विशेषो यदा राजा समं सर्वेषु वर्तते ।
तदोद्यम-समर्थानाम् उत्साहः परिहीयते ॥ २।६९ ॥
किं च-
त्रिविधाः पुरुषा राजन्न् उत्तमाधम-मध्यमाः ।
नियोजयेत् तथैवैतांस् त्रिविधेष्व् एव कर्मसु ॥ २।७० ॥
यतः-
स्थान एव निज्योज्यन्ते भृत्याश् चाभरणानि च ।
नहि चूडामणिः पादे नूपुरं शिरसा कृतम् ॥ २।७१ ॥
अपि च-
कनक-भूषण-सङ्ग्रहणोचितो यदि मणिस् त्रपुणि प्रणिधीयते ।
न स विरौति न चापि न शोभते भवति योजयितुः वचनीयता ॥ २।७२ ॥

अन्यच्च-

मुकुटे रोपिता काचश्चरणाभरणे मणिः ।
नहि दोषो मणेः अस्ति किन्तु साधोः अविज्ञता ॥ २।७३ ॥

पश्य-

बुद्धिमान् अनुरक्तो ऽयम् अयं शूर इतो भयम् ।
इति भृत्य-विचारज्ञो भृत्यैः आपूर्यते नृपः ॥ २।७४ ॥

तथा हि-

अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।
पुरुष-विशेषं प्राप्ता भवन्त्य् अयोग्याश्च योग्याश्च ॥ २।७५ ॥

अन्यच्च-

किं भक्तेनासमर्थेन किं शक्तेनापकारिणा ।
भक्तं शक्तं च मां राजन् नावज्ञातुं त्वम् अर्हसि ॥ २।७६ ॥

यतः-

अवज्ञानाद् राज्ञो भवति मति-हीनः परिजनस्
ततस् तत्-प्रामाण्याद् भवति न समीपे बुध-जनः ।
बुधैस् त्यक्ते राज्ये न हि भवति नीतिः गुणवती
विपन्नायां नीतौ सकलम् अवशं सीदति जगत् ॥ २।७७ ॥

अपरं च-

जनं जनपदा नित्यम् अर्चयन्ति नृपार्चितम् ।
नृपेणावमतो यस् तु स सर्वैः अवमन्यते ॥ २।७८ ॥

किं च-

बालाद् अपि गृहीतव्यं युक्तम् उक्तं मनीषिभिः ।
रवेः अविषये किं न प्रदीपस्य प्रकाशनम् ॥ २।७९ ॥

पिङ्गलकोऽवदत्- भद्र दमनक ! किम् एतत् ? त्वम् अस्मदीयप्रधानामात्यपुत्र इयन्तं कालं यावत् कुतोऽपि खल-वाक्यान् नागतो ऽसि । इदानीं यथाभिमतं ब्रूहि ।

दमनको ब्रूते- देव ! पृच्छामि किञ्चित् । उच्यताम् । उदकार्थी स्वामी पानीयम् अपीत्वा किम् इति विस्मित इव तिष्ठति ।

पिङ्गलकोऽवदत्-भद्रम् उक्तं त्वया । किन्त्व् एतद् रहस्यं वक्तुं काचिद् विश्वास-भूमिः नास्ति । तथापि निभृतं कृत्वा कथयामि । शृणु, सम्प्रति वनम् इदम् अपूर्व-सत्त्वाधिष्ठितम् अतो ऽस्माकं त्याज्यम् । अनेन हेतुना विस्मितो ऽस्मि । तथा च श्रुतो मयापि महान् अपूर्व-शब्दः । शब्दानुरूपेणास्य प्राणिनो महता बलेन भवितव्यम् ।

दमनको ब्रूते-देव ! अस्ति तावद् अयं महान् भय-हेतुः । स शब्दो ऽस्याभिः अप्य् आकर्णितः । किन्तु स किं मन्त्री यः प्रथमं भूमि-त्यागं पश्चाद् युद्धं चोपविशति अस्मिन् कार्य-सन्देहे भृत्यानाम् उपयोग एव ज्ञातव्यः । यतः-

बन्धु-स्त्री-भृत्य-वर्गस्य बुद्धेः सत्त्वस्य चात्मनः ।
आपन्-निकष-पाषाणे नरो जानाति सारताम् ॥ २।८० ॥

सिंहो ब्रूते- भद्र ! महती शङ्का मां बाधते ।

दमनकः पुनः आह स्वगतम्- अन्यथा राज्यसुखं परित्यज्य स्थानान्तरं गन्तुं कथं मां सम्भाषसे ? प्रकाशं ब्रूते-देव ! यावद् अहं जीवामि तावद् भयं न कर्तव्यम् । किन्तु करटकादयो ऽप्य् आश्वास्यन्तां यस्माद् आपत्-प्रतीकार-काले दुर्लभह् पुरुष-समवायः ।

ततस्तौ दमनककरटकौ राज्ञा सर्वस्वेनापि पूजितौ भय-प्रतीकारं प्रतिज्ञाय चलितौ ।

## २-०४ दमनकस्य विश्वासः

करटको गच्छन् दमनकम् आह- सखे ! किं शक्त्य-प्रतीकारो भय-हेतुः अशक्य-प्रतीकारो वेति न ज्ञात्वा भयोपशमं प्रतिज्ञाय कथम् अयं महा-प्रसादो गृहीतः ? यतो ऽनुपकुर्वाणो न कस्याप्य् उपायनं गृह्णीयाद् विशेषतो राज्ञः । पश्य-

यस्य प्रसादे पद्मास्ते विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्व-तेजोमयो हि सः ॥ २।८१ ॥

तथा हि-

बालो ऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्य् एषा नर-रूपेण तिष्ठति ॥ २।८२ ॥

दमनको विहस्याह- मित्र ! तूष्णीम् आस्यताम् । ज्ञातं मया भय-कारणम् । बलीवर्द-नर्दितं तत् । वृषभाश् चास्माकम् अपि भक्ष्याः । किं पुनः सिंहस्य ।

करटको ब्रूते- यद्येवं तदा किम् पुनः स्वामि-त्रासस् तत्रैव किम् इति नापनीतः ।

दमनको ब्रूते-यदि स्वामि-त्रासस् तत्रैव मुच्यते तदा कथम् अयं महा-प्रसाद-लाभः स्यात् । अपरं च-

निरपेक्षो न कर्तव्यो भृत्यै स्वामी कदाचन ।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद् दधि-कर्णवत् ॥ २।८३ ॥

करटकः पृच्छति–कथम् एतत् ?

दमनकः कथयति-

## ०२-०३ दुर्दान्तनामसिंहकथा

अस्त्युत्तरपथेऽर्बुदशिखरनाम्नि पर्वते दुर्दान्तो नाम महा-विक्रमः सिंहः । तस्य पर्वत-कन्दरम् अधिशयानस्य केसराग्रं कश्चिन् मूषिकः प्रत्यहं छिनत्ति । ततः केसराग्रं लूनं दृष्ट्वा कुपितो विवरान्तर्गतं मूषिकम् अलभमानोऽचिन्तयत्-

क्षुद्र-शत्रुः भवेद् यस् तु विक्रमान् नैव लभ्यते ।
तम् आहन्तुं पुरस्कार्यः सदृशस् तस्य सैनिकः ॥ २।८४ ॥

इत्यालोच्य तेन ग्रामं गत्वा विश्वासं कृत्वा दधिकर्ण-नामा बिडालो यत्नेवानीय मांसाहारं दत्त्वा स्व-कन्दरे स्थापितः । अनन्तरं तद्-भयान् मूषिको ऽपि विलान्न निःसरति । तेनासौ सिंहो ऽक्षत-केशरः सुखं स्वपिति । मूषिक-शब्दं यदा यदा शृणोति, तदा तदा मांसाहार-दानेन तं बिडालं संवर्धयति ।

अथैकदा स मूषिकः क्षुधापीडितो बहिः सञ्चरन् बिडालेन प्राप्तो व्यापादितश्च । अनन्तरं स सिंहोऽनेक-कालं यावन् मूषिकं न पश्यति तत्-कृतरावमपि न शृणोति तदा तस्यानुपयोगाद् बिडालस्याप्याहार-दाने मन्दादरो बभूव।
ततोऽसावाहार-विहार-विरहाद्-दुर्बलो दधिकर्णोवसन्नो बभूव ।

अतोहं ब्रवीमि “निरपेक्षो न कर्तव्यः” इत्यादि।

ततो दमनक-करटकौ सञ्जीवक-समीपं गतौ । तत्र करटकस् तरु-तले साटोपम् उपविष्टः ।

दमनकः सञ्जीवक-समीपं गत्वाऽब्रवीत् - अरे वृषभ ! एषोहं राज्ञा पिङ्गलकेनारण्य-रक्षणार्थे नियुक्तः । सेनापतिः करटकः समज्ञापयति - “सत्वरमागच्छ । न चेद् अस्माद् अरण्याद् दूरम् अपसर । अन्यथा ते विरुद्धं फलं भविष्यति ।” न जाने क्रुद्धः स्वामी किं विधास्यति । तच्-छ्रुत्वा सञ्जीवकश् चायात् ।

आज्ञा-भङ्गो नरेन्द्राणां ब्राह्मणानाम् अनादरः ।
पृथक् शय्या च नारीणाम् अशस्त्र-विहितो वधः ॥ २।८५ ॥

ततो देश-व्यवहारानभिज्ञः सञ्जीवकः सभयम् उपसृत्य साष्टाङ्ग-पातं करटकं प्रणतवान् । तथा चोक्तम्-

मतिः एव बलाद् गरीयसी यद्-अभावे करिणाम् इयं दशा ।
इति घोषयतीव डिण्डिमः करिणो हस्तिपकाहतः क्वणन् ॥ २।८६ ॥

अथ सञ्जीवकः साशङ्कम् आह-सेनापते ! किं मया कर्तव्यम् । तद् अभिधीयताम् ।

करटको ब्रूते-वृषभ ! अत्र कानने तिष्ठसि । अस्मद्-देव-पादारविन्दं प्रणय ।

सञ्जीवको ब्रूते-तद्-अभय-वाचं मे यच्छ । गच्छामि ।

करटको ब्रूते-शृणु रे बलीवर्द ! अलम् अनया शङ्कया । यतः-

प्रतिवाचम् अदत्त केशवः शपमानाय न चेदि-भूभुजे ।
अनुहुङ्कुरुते घन-ध्वनिं न हि गोमायु-रुतानि केसरी ॥ २।८७ ॥

अन्यच्च-

तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
समुच्छ्रितान् एव तरून् प्रबाधते
महान् महत्येव करोति विक्रमम् ॥ २।८८ ॥

ततस् तौ सञ्जीवकं कियद् दूरे संस्थाप्य पिङ्गलक-समीपं गतौ । ततो राजा सादरम् अवलोकितौ प्रणम्योपविष्टौ । राजाह- त्वया स दृष्टः ?

दमनको ब्रूते-देव ! दृष्टः । किन्तु यद् देवेन ज्ञातं तत् तथा । महान् एवासौ देवं द्रष्टुम् इच्छति । किन्तु महाबलो ऽसौ ततः सज्जीभूयोपविश्य दृश्यताम् । शब्द-मात्राद् एव न भेतव्यम् । तथा चोक्तम्-

शब्द-मात्रान्न भेतव्यम् अज्ञात्वा शब्द-कारणम् ।
शब्दहेतुं परिज्ञाय कुट्टनी गौरवं गता ॥ २।८९ ॥

राजाह-कथम् एतत् ?

दमनकः कथयति-

## ०२-०४ करालकुट्टिनीकथा

शब्द-मात्रान्न भेतव्यम् अज्ञात्वा शब्द-कारणम् ।
शब्द-हेतुं परिज्ञाय कुट्टनी गौरवं गता ॥ २।८९ ॥

अस्ति श्रीपर्वतमध्ये ब्रह्मपुराख्यं नगरम् । तच्-छिखर-प्रदेशे घण्टाकर्णो नाम राक्षसः प्रतिवसतीति जन-प्रवादः श्रूयते । एकदा घण्टाम् आदाय पलायमानः कश्चिच् चौरो व्याघ्रेण व्यापादितः । तत्-पाणि-पतिता घण्टा वानरैः प्राप्ता । वानरास् तां घण्टाम् अनुक्षणं वादयन्ति । ततो नगर-जनैः स मनुष्यः खादितो दृष्टः प्रतिक्षणं घण्टा-रवश्च श्रूयते । अनन्तरं घण्टाकर्णः कुपितो मनुष्यान् खादति घण्टां च वादयतीत्युक्त्वा सर्वे जना नगरात् पलायिताः । ततः करालया नाम कुट्टन्या विमृश्यानवरो ऽयं घण्टा-नादः । तत् किं

मर्कटा घण्टां वादयन्तीति स्वयं विज्ञाय राजा विज्ञापितः-देव ! यदि कियद् धनोपक्षयः क्रियते, तदाहम् एनं घण्टाकर्णं साधयामि ।

ततो राजा तस्यै धनं दत्तम् । कुट्टन्या मण्डलं कृत्वा तत्र गणेशादि-पूजा-गौरवं दर्शयित्वा स्वयं वानर-प्रिय-फलान्य् आदाय वनं प्रविश्य फलान्य् आकीर्णानि । ततो घण्टां परित्यज्य वानराः फलासक्ता बभूवुः । कुट्टनी च घण्टां गृहीत्वा नगरम् आगता सर्व-जन-पूज्याभवत् ।

अतोऽहं ब्रवीमि- शब्दमात्रान्न भेतव्यम् इत्यादि ।

ततः सञ्जीवकम् आनीय दर्शनं कारितवन्तौ । पश्चात् तत्रैव परम-प्रीत्या निवसति ।

## २-०५ पिङ्गलकेन सञ्जीवकस्य कार्यनियोजनम्

अथ कदाचित् तस्य सिंहस्य भ्राता स्तब्ध-कर्ण-नामा सिंहः समागतः । तस्यातिथ्यं कृत्वा सिंहम् उपवेश्य पिङ्गलकस् तद्-आहाराय पशुं हन्तुं चलितः । अत्रान्तरे सञ्जीवको वदति-देव ! अद्य हत-मृगाणां मांसानि क्व ?

राजाह-दमनक-करटकौ जानीतः ।

सञ्जीवको ब्रूते-ज्ञायतां किम् अस्ति नास्ति वा ?

सिंहो विमृश्याह- नास्त्येव तत् ।

सञ्जीवको ब्रूते- कथम् एतावन् मांसं ताभ्यां खादितम् ?

राजाह- खादितं व्ययितम् अवधीरितं च । प्रत्यहम् एष क्रमः ।

सञ्जीवको ब्रूते- कथं श्रीमद्देवपादानां अगोचरेणैव क्रियते ?

राजाह- मदीयागोचरेणैव क्रियते ।

अथ सञ्जीवको ब्रूते- नैतद् उचितम् । तथा चोक्तम्-

नानिवेद्य प्रकुर्वीत भर्तुः किञ्चिद् अपि स्वयम् ।
कार्यम् आपत्- प्रतीकाराद् अन्यत्र जगतीपते ॥ २।९० ॥

अन्यच्च-
कमण्डलूपमो ऽमात्यस् तनु-त्यागी बहु-ग्रहः ।
नृपते किङ्कणो मूर्खो दरिद्रः किंवराटकः ॥ २।९१ ॥

स ह्यमात्यः सदा श्रेयान् काकिनीं यः प्रवर्धयेत् ।
कोषः कोषवतः प्राणाः प्राणाः प्राणा न भूपतेः ॥ २।९२ ॥

किं चार्थैः न कुलाचारैः सेवताम् एति पूरुषः ।
धन-हीनः स्व-पत्न्यापि त्यज्यते किं पुनः परैः ॥ २।९३ ॥

एतच्च राज्ञः प्रधानं दूषणम्-

अतिव्ययो ऽनपेक्षा च तथार्जनम् अधर्मतः ।
मोषणं दूर-संस्थानां कोष-व्यसनम् उच्यते ॥ २।९४ ॥

यतः-

क्षिप्रम् आयतम् अनालोच्य व्ययमानः स्व-वाञ्छया ।
परिक्षीयत एवासौ धनी वैश्रवणोपमः ॥ २।९५ ॥

स्तब्धकर्णो ब्रूते-शृणु भ्रातः चिराश्रिताद् एतौ दमनक-करटकौ सन्धि-विग्रह-कार्याधिकारिणौ च कदाचिद् अर्थाधिकारे न नियोक्तव्यौ । अपरं च नियोग-प्रस्तावे यन् मया श्रुतं तत् कथ्यते ।

ब्राह्मणः क्षत्रियो बन्धुः नाधिकारे प्रशस्यते ।
ब्राह्मणः सिद्धम् अप्य् अर्थं कृच्छ्रेणापि न यच्छति ॥ २।९६ ॥

नियुक्तः क्षत्रियो द्रव्ये खड्गं दर्शयते ध्रुवम् ।
सर्वस्वं ग्रसते बन्धुः आक्रम्य ज्ञाति-भावतः ॥ २।९७ ॥

अपराधेऽपि निःशङ्को नियोगी चिर-सेवकः ।
स स्वामिनम् अवज्ञाय चरेच्च निरवग्रहः ॥ २।९८ ॥

उपकर्ताधिकारस्थः स्वापराधं न मन्यते ।
उपकारं ध्वजी-कृत्य सर्वम् एव विलुम्पति ॥ २।९९ ॥

उपांशुक्रीडितोऽमात्यः स्वयं राजायते यतः ।

अवज्ञा क्रियते तेन सदा परिचयाद् ध्रुवम् ॥ २।१०० ॥

अन्तःदुष्टः क्षमा-युक्तः सर्वानर्थ-करः किल ।
शकुनिः शकटारश्च दृष्टान्तावत्र भूपते ॥ २।१०१ ॥

सदामत्यो न साध्यः स्यात् समृद्धः सर्व एव हि ।
सिद्धानाम् अयम् आदेशः ऋद्धिश् चित्त-विकारिणी ॥ २।१०२ ॥

प्राप्तार्थ-ग्रहणं द्रव्य-परीवर्तो ऽनुरोधनम् ।
उपेक्षा बुद्धि-हीनत्वं भोगो ऽमात्यस्य दूषणम् ॥ २।१०३ ॥

नियोग्यर्थ-ग्रहोपायो राज्ञा नित्य-परीक्षणम् ।
प्रतिपत्ति-प्रदानं च तथा कर्म-विपर्ययः ॥ २।१०४ ॥

निपीडिता वमन्त्य् उच्चैः अन्तः-सारं महीपतेः ।
दुष्ट-व्रणा इव प्रायो भवन्ति हि नियोगिनः ॥ २।१०५ ॥

मुहुः नियोगिनी बाध्या वसुधारा महीपते ।
सकृत् किं पीडितं स्नान-वस्त्रं मुञ्चेद् घृतं पयः ॥ २।१०६ ॥

एतत् सर्वं यथावसरं ज्ञात्वा व्यवहर्तव्यम् ।

सिंहो ब्रूते- अस्ति तावद् एवम् । किन्त्वेतौ सर्वथा न मम वचनकारिणौ ।

स्तब्धकर्णो ब्रूते- एतत् सर्वम् अनुचितं सर्वथा । यतः-

आज्ञा-भङ्ग-करान् राजा न क्षमेत सुतान् अपि ।
विशेषः को नु राज्ञश्च राज्ञश् चित्र-गतस्य च ॥ २।१०७ ॥

स्तब्धस्य नश्यति यशो विषम् अस्य मैत्री
नष्टेन्द्रियस्य कुलम् अर्थ-परस्य धर्मः ।
विद्या-फलं व्यसनिनः कृपणस्य सौख्यं
राज्यं प्रमत्त-सचिवस्य नराधिपस्य ॥ २।१०८ ॥

अपरं च-

तस्करेभ्यो नियुक्तेभ्यः शत्रुभ्यो नृप-वल्लभात् ।
नृपतिः निज-लोभाच्च प्रजा रक्षेत् पितेव हि ॥ २।१०९ ॥

भ्रातः ! सर्वथास्मद्-वचनं क्रियताम् । व्यवहारो ऽप्य् अस्माभिः कृत एव । अयं सञ्जीवकः सस्य-भक्षको ऽर्थाधिकारे नियुज्यताम् ।

एतद्वचनात् तथानुष्ठिते सति तद् आरभ्य पिङ्गलक-सञ्जीवकयोः सर्व-बन्धु-परित्यागेन महता स्नेहेन कालो ऽतिवर्तते ।

## २-०६ करटकदमनकयोश्चिन्ता

ततोऽनुजीविनामप्याहारदाने शैथिल्य-दर्शनाद् दमनक-करटकावन्योन्यं चिन्तयतः । तद् आह दमनकः करटकम्-मित्र ! किं कर्तव्यम् ? आत्म-कृतोऽयं दोषः । स्वयं कृतेऽपि दोषे परिदेवनम् अप्य् अनुचितम् । तथा चोक्तम्-

स्वर्ण-रेखाम् अहं स्पृष्ट्वा बद्धात्मानं च दूतिका ।
आदित्सुश्च मणिं साधुः स्व-दोषाद् दुःखिता इमे ॥ २।११० ॥

करटको ब्रूते–कथम् एतत् ?

दमनकः कथयति-

## ०२-०५ कन्दर्पकेतुपरिव्राजककथा

स्वर्ण-रेखाम् अहं स्पृष्ट्वा बद्धात्मानं च दूतिका ।
आदित्सुश्च मणिं साधुः स्व-दोषाद् दुःखिता इमे ॥ २।११० ॥

अस्ति काञ्चनपुर-नाम्नि नगरे वीरविक्रमो राजा । तस्य धर्माधिकारिणा कश्चिन् नापितो वध्य-भूमिं नीयमानः कन्दर्पकेतु-नाम्ना परिव्राजकेन साधु-द्वितीयकेन नायं हन्तव्यः इत्युक्त्वा वस्त्राञ्चलेन धृतः । राज-पुरुषा ऊचुः-किम् इति नायं वध्यः ।

स आह- श्रूयताम् । स्वर्णरेखाम् अहं स्पृष्ट्वा इत्यादि पठति ।

त आहुः–कथम् एतत् ?

परिव्राजकः कथयति-अहं सिंहल-द्वीपस्य भूपतेः जीमूतकेतः पुत्रः दन्दर्पकेतुः नाम । मध्ये चतुर्दश्याम् आविर्भूत-कल्पतरु-तले रत्नावली-किरण-कबूतर-पर्यङ्क-स्थिता सर्वालङ्कार-भूषिता लक्ष्मीः इव वीनां वादयन्ती कन्या काचिद् दृश्यते इति । ततोऽहं पोत-व्णिजम् आदाय पोतम् आरुह्य तत्र गतः । अनन्तरं तत्र गत्वा पर्यङ्केऽधमग्रा तथैव सावलोकिता । ततस् तल्-लावण्य-गुणाकृष्टेन मयापि तत्-पश्चाज् झम्पो दत्तः । तद्-अनन्तरं कनकपत्तनं प्राप्य सुवर्ण-प्रासादे तथैव पर्यङ्के स्थिता विद्याधरीभिः उपास्यमाना मयालोकिता । तथाप्य् अहं दूराद् एव दृष्ट्वा सखीं प्रस्थाप्य सादरं सम्भाषितः । तत्-सख्या च मया पृष्ट्या समाख्यातम्-एषा कन्दर्पकेलि-नाम्नो विद्याधर-चक्रवर्तिनः पुत्री रत्नमञ्जरी नाम प्रतिज्ञापिता विद्यते । यः कनकवर्तनं स्व-चक्षुषागत्य पश्यति, स एव पितुः अगोचरो ऽपि मां परिणेष्यतीति मनसः सङ्कल्पः । तद् एनां गान्धर्व-विवाहेन परिणयतु भवान् । अथ तत्र वृत्ते गन्धर्व-विवाहे तथा सह रममाणस् तत्राहं तिष्ठामि । तत एकदा रहसि तयोक्तम्-स्वामिन् ! स्वेच्छया सर्वम् इदम् उपभोक्तव्यम् । एषा चित्र-गता स्वर्ण-रेखा नाम विद्याधरी न कदाचित् स्प्रष्टव्या । पश्चाद् उपजात-कौतुकेन मया स्वर्णरेखा स्व-हस्तेन स्पृष्टा । तथा चित्रतयाप्य् अहं चरण-पद्मेन ताडित आगत्य स्व-राष्ट्रे पतितः ।

अथ दुःखितो ऽहं परिव्रजितः पृथिवीं परिभ्राम्यन्न् इमां न्गरीम् अनुप्राप्तः । अत्र चातिकान्ते दिवसे गोप-गृहे सुप्तः सन्न् अपश्यम् । प्रदोष-समये पशूनां पालनं कृत्वा स्व-गेहम् आगतो गोपः स्व-वधूं दूत्या सह किम् अपि मन्त्रयन्तीम् अपश्यत् । ततस् तां गोपीं ताडयित्वा स्तम्भे बद्ध्वा सुप्तः । ततो ऽर्ध-रात्रे एतस्य नापितस्य वधूः दूती पुनस् तां गोपीम् उपेत्यावदत्-तव विरहानल-दग्धो ऽसौ स्मर-शर-जर्जरितो मुमूर्षुः इव वर्तते । तथा चोक्तम्-

रजनी-चर-नाथेन खण्डिते तिमिरे निशि ।
यूनां मनांसि विव्याध दृष्ट्वा दृष्ट्वा मनोभवः ॥ २।१११ ॥

तस्य तादृशीम् अवस्थाम् अवलोक्य परिक्लिष्ट-मनास् त्वाम् अनुवर्तितुम् आगता । तद् अहम् अत्रात्मानं बद्ध्वा तिष्ठामि । त्वं तत्र गत्वा तं सन्तोष्य सत्वरम् आगमिष्यसि । तथानुष्ठिते सति स गोपः प्रबुद्धो ऽवदत्- इदानीं त्वां पापिष्ठां जारान्तिकं नयामि । ततो यदासौ न किञ्चिद् अपि ब्रूते तदा क्रुद्धो गोपः-दर्पान् मम वचसि प्रत्युत्तरम् अपि न ददासि इत्युक्त्वा कोपेन तेन कर्तरिकामादायास्या नासिका छिन्ना । तथा कृत्वा पुनः सुप्तो गोपो निद्राम् उपगतः । अथागत्य गोपी दूतीम् अपृच्छत्- का वार्ता ?

दूत्योक्तम्- पश्य माम् । मुखम् एव वार्तां कथयति ।

अनन्तरं सा गोपी तथा कृत्वात्मानं बद्ध्वा स्थिता । इयं च दूती तां छिन्न-नासिकां गृहीत्वा स्व-गृहं प्रविश्य स्थिता । ततः प्रातः एवानेन नापितेन स्व-वधूः क्षुर-भाण्डं याचिता सती क्षुरम् एकं प्रादात् । ततो ऽसमग्र-भाण्डे प्राप्ते समुपजात-कोपो ऽयं नापितस् तं क्षुरं दूराद् एव गृहे क्षिप्तवान् । अथ कृतार्तरायेयं मे नासिकानेन छिन्नेत्युक्त्वा धर्माधिकारि-समीपम् एतम् आनीतवती । सा च गोपी तेन गोपेन पुनः पृष्टोवाच- अरे पाप ! को मां महासती विरूपयितुं समर्थः । मम व्यवहारम् अकल्मषम् अष्टौ लोकपाला एव जानन्ति, यतः-

आदित्य-चन्द्रावनिलानलश्च
द्यौः भूमिः आपो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मश्च जानाति नरस्य वृत्तम् ॥ २।११२ ॥

यद्यहं परमसती स्याम्, त्वां विहायान्यं न जाने, पुरुषान्तरं स्वप्नेपि न हि भजे । तेन धर्मेण छिन्नापि मम नासिका-च्छिन्नास् तु । मया त्वं भस्म-कर्तुं शक्यसे । किं तु स्वामी त्वम् । लोक-भयादुपेक्षे । पश्य मन् मुखम् । ततो यावद् असौ गोपो दीपं प्रज्वाल्य तन् मुखम् अवलोकते तावद् उन्नसं मुखम् अवलोक्य तच्चरणयोः पतितः - 'धन्योऽयं यस्येदृशी भार्या परम-साध्वी' इति । योऽयमास्ते साधुरेतवृत्तान्तम् अपि

कथयामि । अयं स्वगृहान् निर्गतो द्वादश-वर्म-लयोपकण्ठाद् इमां नगरीम् अनुप्राप्तः । अत्र वेश्यागृहे सुप्तः। तस्याः कुट्टन्या गृहद्वारि स्थापित-काष्ठ-घटित-वेतालस्य मूर्धनि रत्नम् एकम् उत्कृष्टम् आस्ते। तत्र लुब्धेनानेन साधुना रात्राव् उत्थाय रत्नं ग्रहीतुं यत्नः कृतः । तदा तेन वेतालेन सूत्रसंचारितबाहुभ्यां पीडितः सन्नार्तनादमयं चकार । पश्चादुत्थाय कुट्टन्योक्तम्'पुत्र! मलयोपकण्ठादागतोऽसि । तत्सर्वरत्नानि प्रयच्छास्मै नो चेदनेन न त्यक्तव्योऽसि ।' इत्थमेवायं चेटकः । ततोऽनेन सर्वरत्नानि समर्पितानि यथाऽयम् अपहृत-सर्वस्वोऽस्मासु समागत्य मिलितः। एतत् सर्वं श्रुत्वा राज-पुरुषौ धर्माधिकारी प्रवर्तितः। अनन्तरं तेन सा दूती गोपी च ग्रामावहिर्निःसारिते । नापितश्च गृहं गतः ।

अतोऽहं ब्रवीमि-"स्वर्णरेखामहं स्पृष्ट्वा" इत्यादि ॥

अथ स्वयं कृतोऽयं दोषः । अत्र विलपनं नोचितम् । (क्षणं विमृश्य ।) मित्र! यथाऽनयोः सौहार्दं मया कारितं तथा मित्र-भेदोऽपि मया कार्यः।

यतः,

अतथ्यान्यपि तथ्यानि दर्शयन्ति हि पेशलाः ।
समे निम्नोन्नतानीव चित्र-कर्म-विदो जनाः ॥ २।११३ ॥

अपरं च,

उत्पन्नेषु च कार्येषु मतिः यस्य न हीयते ।
स निस्तरति दुर्गाणि गोपी जार-द्वयं यथा ॥ २।११४ ॥

करटकः पृच्छति-कथम् एतत् ?

दमनकः कथयति-

## ०२-०६ गोपीजारद्वयकथा

उत्पन्नेषु च कार्येषु मतिः यस्य न हीयते ।
स निस्तरति दुर्गाणि गोपी जार-द्वयं यथा ॥ २।११४ ॥

अस्ति द्वारवत्यां पुर्यां कस्यचिद् गोपस्य वधूः बन्धकी । सा ग्रामस्य दण्ड-नायकेन तत्-पुत्रेण च समं रमते । तथा चोक्तम्-

नाग्निस् तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्व-भूतानां न पुंसां वाम-लोचना ॥ २।११५ ॥

न दानेन न मानेन नार्जवेन न सेवया ।
न शस्त्रेण न शास्त्रेण सर्वथा विषमाः स्त्रियः ॥ २।११६ ॥

यतः-

गुणाश्रयं कीर्ति-युतं च कान्तं
पतिं रतिज्ञं सधनं युवानम् ।
विहाय शीघ्रं वनिता व्रजन्ति
नरान्तरं शील-गुणादि-हीनम् ॥ २।११७ ॥

अपरं च-

न तादृशीं प्रीतिम् उपैति नारी
विचित्र-शय्या शयितापि कामम् ।
यथा हि दूर्वादि-विकीर्ण-भूमौ
प्रयाति सौख्यं पर-कान्ति-सङ्गात् ॥ २।११८ ॥

अथ कदाचित् सा दण्ड-नायक-पुत्रेण सह रममाणा तिष्ठति । अथ दण्डनायकोऽपि रन्तुं तत्रागतः । तम् आयान्तं दृष्ट्वा तत्पुत्रं कुसूले निक्षिप्य दण्डनायकेन सह तथैव क्रीडति । अनन्तरं तस्य भर्ता गोपो गोष्ठात्समागतः । तम् अवलोक्य गोप्योक्तम्- दण्डनायक ! त्वं लगुडं गृहीत्वा कोपं दर्शयन् सत्वरं गच्छ । तथा तेनानुष्ठिते गोपेन गृहम् आगत्य पृष्टा- केन कार्येण दण्डनायकः समागत्यात्र स्थितः ?

सा ब्रूते- अन्यं केनापि कार्येण पुत्रस्योपरि क्रुद्धः । स च मार्यमाणोऽप्यत्रागत्य प्रविष्टो मया कुसूले निक्षिप्य रक्षितः । तत्पित्रा चान्विष्यात्र न दृष्टः । अत एवायं दण्डनायकः क्रुद्ध एव गच्छति ।

ततः सा तत्पुत्रं कुसूलाद् बहिष्कृत्य दर्शितवती । तथा चोक्तम्-

आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामाश् चाष्टगुणः स्मृतः ॥ २।११९ ॥

अतोऽहं ब्रवीमि-उतपन्नेष्वपि कार्येषु इत्यादि ।

करटको ब्रूते-अस्त्वेवम् । किन्त्व् अनयोः महानन्योन्य-निसर्गोपजात-स्नेह कथं भेदयितुं शक्यः ?

दमनको ब्रूते-उपायः क्रियताम् । तथा चोक्तम्-

उपायेन जयो यादृग् रिपोस् तादृङ् न हेतिभिः ।
उपायज्ञोऽल्पकायोऽपि न शूरैः परिभूयते ॥ २।१२० ॥

करटकः पृच्छति-कथम् एतत् ?

दमनकः कथयति-

## ०२-०७ वायसदंपतीकथा

कस्मिंश्चित् तरौ वायसदम्पती निवसतः । तयोश् चापृत्यानि तत्-कोटरावस्थितेन कृष्ण-सर्पेण खादितानि । ततः पुनः गर्भवती वायसी वायसम् आह- नाथ ! त्यज्यताम् अयं वृक्षः । अत्रावस्थित-कृष्ण-सर्पेणावयोः सन्ततिः सततं भक्ष्यते । यतः-

दुष्टा भार्या शठं मित्रं भृत्यश् चोत्तर-दायकः ।
स-सर्पे च गृहे वासो मृत्युः एव न संशयः ॥ २।१२१ ॥

वायसो ब्रूते-प्रिये ! न भेतव्यम् । वारं वारं मवैतस्य सोढः । इदानीं पुनः न क्षन्तव्यः ।

वायस्य् आह-कथम् एतेन बलवता सार्धं भवान् विग्रहीतुं समर्थः ।

वायसो ब्रूते-अलम् अनया शङ्कया । यतः-

बुद्धिः यस्य बलं तस्य निर्बुद्धेस् तु कुतो बलम् ।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः ॥ २।१२२ ॥

वायसी विहस्याह–कथम् एतत् ?

वायसः कथयति-

## ०२-०८ चतुरशशकः

अस्ति मन्दर-नाम्नि पर्वते दुर्दान्तो नाम सिंहः । स च सर्वदा पशूनां वधं कुर्वन्न् आस्ते । ततः सर्वैः पशुभिः मिलित्वा स सिंहो विज्ञप्तः-मृगेन्द्र ! किम् अर्थम् एकदा बहु-पशु-घातः क्रियते । यदि प्रसादो भवति तदा वयम् एव भवद्-आहाराय प्रत्यहम् एकैकं पशुम् उपढौकयामः ।

ततः सिंहेनोक्तम्-यद्य् एतद् अभिमतं भवतां तर्हि भवतु तत् ।

ततः-प्रभृत्येकैकं पशुम् उपकल्पितं भक्षयन्न् आस्ते । अथ कदाचिद् वृद्ध-शशकस्य वारः समायातः । सो ऽचिन्तयत्-

त्रास-हेतोः विनीतिस् तु क्रियते जीविताशया ।
पञ्चत्वं चेद् गमिष्यामि किं सिंहानुनयेन मे ॥ २।१२३ ॥

तन् मन्दं मन्दं गच्छामि । ततः सिंहो ऽपि क्षुधा-पीडितः कोपात् तम् उवाच- कुतस्त्वं विलम्ब्य समागतो ऽसि ।

शशकोऽब्रवीत्- देव ! नाहम् अपराधी । आगच्छन् पथि सिंहान्तरेण बलाद् धृतः । तस्याग्रे पुनः आगमनाय शपथं कृत्वा स्वामिनं निवेदयितुम् अत्रागतो ऽस्मि ।

सिंहः सकोपम् आह-सत्वरं गत्वा दुरात्मानं दर्शय । क्व स दुरात्मा तिष्ठति ।

ततः शशकस्तं गृहीत्वा गभीर-कूपं दर्शयितुं गतः । तत्रागत्य स्वयम् एव पश्यतु स्वामीत्युक्त्वा तस्मिन् कूप-जले तस्य सिंहस्यैव प्रतिबिम्बं दर्शितवान् । ततो ऽसौ क्रोधाध्मातो दर्पात् तस्योपर्य् आत्मानं निक्षिप्य पञ्चत्वं गतः ।

अतोऽहं ब्रवीमि बुद्धिः यस्य इत्यादि ।

वायस्याह- श्रुतं मया सर्वम् । सम्प्रति यथा कर्तव्यं ब्रूहि ।

वायसोऽवदत्-अत्रासन्ने सरसि राजपुत्रः प्रत्यहम् आगत्य स्नाति । स्नान-समये मद्-अङ्गाद् अवतारितं तीर्थ-शिला-निहितं कनक-सूत्रं चञ्च्वा विधृत्यानीयास्मिन् कोटरे धारयिष्यसि ।

अथ कदाचित् स्नातुं जलं प्रविष्टे राज-पुत्रे वायस्या तद्-अनुष्ठितम् । अथ कनक-सूत्रानुसरण-प्रवृत्तै राज-पुरुषैस् तत्र तरु-कोटरे कृष्ण-सर्पो दृष्टो व्यापादितश्च ।

अतोऽहं ब्रवीमि-उपायेन हि यच् छक्यम् इतेन हि यच् छक्यम् इत्यादि ।

करटको ब्रूते-यद्येवं तर्हि गच्छ । शिवास्ते सन्तु पन्थानः ।

## २-०७ दमनकेन कृतपिङ्गलकमनोचाञ्चल्यम्

ततो दमनकः पिङ्गलकसमीपं गत्वा प्रणम्योवाच- देव ! आत्यन्तिकं किम् अपि महा-भय-कारि कार्यं मन्यमानः समागतो ऽस्मि । यतः-

आपद्य् उन्मार्ग-गमने कार्य-कालात्ययेषु च ।
कल्याण-वचनं ब्रूयाद् अपृष्टो ऽपि हितो नरः ॥ २।१२४ ॥

अन्यच्च-
भोगस्य भाजनं राजा न राजा कार्य-भाजनम् ।
राज-कार्य-परिध्वंसी मन्त्री दोषेण लिप्यते ॥ २।१२५ ॥

तथा हि पश्य । अमात्यानाम् एष क्रमः ।

वरं प्राण-परित्यागः शिरसा वापि कर्तनम् ।
न तु स्वामि-पदावाप्ति-पातकेच्छोः उपेक्षणम् ॥ २।१२६ ॥

पिङ्गलकः सादरम् आह-अथ भवान् किं वक्तुम् इच्छति ।

दमनको ब्रूते- देव ! सञ्जीवकस्तवोपय-सदृश-व्यवहारीव लक्ष्यते । तथा चास्मत् सन्निधाने श्रीमद्-देव-पादानां शक्ति-त्रय-निन्दां कृत्वा राज्यम् एवाभिलषति ।

एतच्छ्रुत्वा, पिङ्गलकः सभयं साश्चर्यं मत्वा तूष्णीं स्थितः । दमनकः पुनः आह-देव ! सर्वामात्य-परित्यागं कृत्वैक एवायं यत् त्वां सर्वाधिकारी कृतः । स एव दोषः । यतः-

अत्युच्छ्रिते मन्त्रिणि पार्थिवे च<br>विष्टभ्य पादाव् उपतिष्ठते श्रीः ।<br>सा स्त्री-स्वभावाद् असहा भरस्य<br>तयोः द्वयोः एकतरं जहाति ॥ २।१२७ ॥

अपरं च-

एकं भूमि-पतिः करोति सचिवं राज्ये प्रमाणं यदा तं मोहात् श्रयते मदः स च मदालस्येन निर्विद्यते । निर्विण्णस्य पदं करोति हृदये तस्य स्वतन्त्र-स्पृहा- स्वातन्त्र्य-स्पृहया ततः स नृपतेः प्राणान् अभिद्रुह्यति ॥ २।१२८ ॥

अन्यच्च-

विष-दग्धस्य भक्तस्य दन्तस्य चलितस्य च ।<br>अमात्यस्य च दुष्टस्य मूलाद् उद्धरणं सुखम् ॥ २।१२९ ॥

किं च-

यः कुर्यात् सचिवायत्तां श्रियं तद्-व्यसने सति ।<br>सो ऽन्धवज् जगती-पालः सीदेत् सञ्चारकैः विना ॥ २।१३० ॥

सर्वकार्येषु स्वेच्छातः प्रवर्तते । तद् अत्र प्रमाणं स्वामी । एतं च जानाति ।

न सो ऽस्ति पुरुषो लोके यो न कामयते श्रियम् ।
परस्य युवतिं रम्यां सादरं नेक्षतेऽत्र कः ॥ २।१३१ ॥

सिंहो विमृश्याह- भद्र ! यद्यप्य् एवं तथापि सञ्जीवकेन सह मम महान् स्नेहः । पश्य-

कुर्वन्न् अपि व्यलीकानि यः प्रियः प्रिय एव सः ।
अशेष-दोष-दुष्टो ऽपि कायः कस्य न वल्लभः ॥ २।१३२ ॥

अन्यच्च-

अप्रियाण्य् अपि कुर्वाणो यः प्रियः प्रिय एव सः ।
दग्ध-मन्दिर-सारेऽपि कस्य वह्नावनादरः ॥ २।१३३ ॥

दमनकः पुनरे एवाह-देव ! स एवातिदोषः, यतः-

यस्मिन्न् एवाधिकं चक्षुः आरोहयति पार्थिवः ।
सुतेऽमात्येऽप्य् उदासीने स लक्ष्म्याश्रीयते जनः ॥ २।१३४ ॥

शृणु देव !

अप्रियस्यापि पथ्यस्य परिणामः सुखावहः ।
वक्ता श्रोता च यत्रास्ति रमन्ते तत्र सम्पदः ॥ २।१३५ ॥

त्वया च मूल-भृत्यानपास्यायम् आगन्तुकः पुरस्कृतः । एतच् चानुचितं कृतम् । यतः-

मूल-भृत्यान् परित्यज्य नागन्तून् प्रतिमानयेत् ।
नातः परतरो दोषो राज्य-भेद-करो यतः ॥ २।१३६ ॥

सिंहो ब्रूते-किम् आश्चर्यम्। मया यद् अभय-वाचं दत्त्वानीतः संवर्धितश्च तत् कथं मह्यं द्रुह्यति।

दमनको ब्रूते-देव !

दुर्जनो नार्जवं याति सेव्यमानो ऽपि नित्यशः।
स्वेद-नाभ्यञ्जनोपायैः श्वपुच्छम् इव नामितम्॥ २।१३७॥

अपरं च-

स्वेदितो मर्दितश् चैव रज्जुभिः परिवेष्टितः।
मुक्तो द्वादशभिः वर्षैः श्व-पुच्छः प्रकृतिं गतः॥ २।१३८॥

अन्यच्च-

वर्धनं वा सम्मानं खलानां प्रीतये कुतः।
फलन्त्य् अमृत-सेकेऽपि न पथ्यानि विष-द्रुमाः॥ २।१३९॥

अतो ऽहं ब्रवीमि-

अपृष्टस् तस्य न ब्रूयाद् यश्च नेच्छेत् पराभवम्।
एष एव सतां धर्मो विपरीतो ऽसतां मतः॥ २।१४०॥

तथा चोक्तम्-

स्निग्धो ऽकुशलान् निवारयति यस् तत् कर्म यन् निर्मलं
सा स्त्री यातु-विधायिनी स मतिमान् यः सद्भिः अभ्यर्च्यते।
सा श्रीः या न मदं करोति स सुखी यस् तृष्णया मुच्यते
तन् मित्रं यत् कृत्रिमं स पुरुषो यः खिद्यते नेन्द्रियैः॥ २।१४१॥

यदि सञ्जीवकव्यसनादितोऽविज्ञापितो ऽपि स्वामी न निवर्तते, तद् ईदृशे भृत्ये न दोषः । तथा च-

नृपः कामासक्तो गणयति न कार्यं न च हितं
यथेष्टं स्वच्छन्दः प्रविचरति मत्तो गज इव ।
ततो मान-ध्मातः स पतति यदा शोक-गहने
तदा भृत्ये दोषान् क्षिपति न निजं वेत्त्य् अविनयम् ॥ २।१४२ ॥

पिङ्गलकः (स्वगतम्)-

न परस्यापराधेन परेषां दण्डम् आचरेत् ।
आत्मनावगतं कृत्वा बध्नीयात् पूजयेच्च वा ॥ २।१४३ ॥

तथा चोक्तम्-

गुण-दोषावनिश्चित्य विधिनं ग्रह-निग्रहे ।
स्व-नाशाय यथा न्यस्तो दर्पात् सर्प-मुखे करः ॥ २।१४४ ॥

प्रकाशं ब्रूते-तदा सञ्जीवकः किं प्रत्यादिश्यताम् ।

दमनकः ससम्भ्रमम् आह- देव! मा मैवम् । एतावता मन्त्र-भेदो जायते । तथा ह्य् उक्तम्-

मन्त्र-बीजम् इदं गुप्तं रक्षणीयं यथा तथा ।
मनाग् अपि न भिद्येत तद् भिन्नं न प्ररोहति ॥ २।१४५ ॥

किं च-

आदेयस्य प्रदेयस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रम् अक्रियमाणस्य कालः पिबति तद्-रसम् ॥ २।१४६ ॥

तद् अवश्यं समारब्धं महता प्रयत्नेन सम्पादनीयम् । किं च-

मन्त्रो योधः इवाधीरः सर्वाङ्गैः संवृतैः अपि ।
चिरं न सहते स्थातुं परेभ्यो भेद-शङ्कया ॥ २।१४७ ॥

यद्य् असौ दृष्ट-दोषो ऽपि दोषान् निवर्त्य सन्धातव्यस् तद् अतीवानुचितम् । यतः-

सकृद् दुष्टं तु यो मित्रं पुनः सन्धातुम् इच्छति ।
स मृत्युः एव गृह्णाति गर्भम् अश्वतरी यथा ॥ २।१४८ ॥

अङ्गाङ्गि-भावम् अज्ञात्वा कथं सामर्थ्य-निर्णयः ।
पश्य टिट्टिभ-मात्रेण समुद्रो व्याकुलीकृतः ॥ २।१४९ ॥

सिंहः पृच्छति- कथम् एतत् ?

दमनकः कथयति-

## ०२-०९ टिट्टिभदम्पती कथा

अङ्गाङ्गि-भावम् अज्ञात्वा कथं सामर्थ्य-निर्णयः ।
पश्य टिट्टिभ-मात्रेण समुद्रो व्याकुलीकृतः ॥ २।१४९ ॥

दक्षिण-समुद्र-तीरे टिट्टिभ-दम्पती निवसतः । तत्र चासन्न-प्रसदा टिट्टिभी भर्तारम् आह-नाथ ! प्रसव-योग्य-स्थानं निभृतम् अनुसन्धीयताम् ।

टिट्टिभो ऽवदत्-भार्ये, नन्व् इदम् एव स्थानं प्रसूति-योग्यम् ।

सा ब्रूते-समुद्र-वेलया व्याप्यते स्थानम् एतम् ।

टिट्टिभो ऽवदत्-किम् अहं त्वया निर्बलः समुद्रेण निग्रहीतव्यः ।

टिट्टिभी विहस्याह-स्वामिन्! त्वया समुद्रेण च महद् अन्तरम्। अथवा-

पराभवं परिच्छेत्तुं योग्यायोग्यं च वेत्ति यः।
अस्तीह यस्य विज्ञानं कृच्छ्रेणापि न सीदति ॥ २।१५० ॥

अपि च-

अनुचित-कार्यारम्भः स्वजन-विरोधो बलीयसा स्पर्धा।
प्रमदा-जन-विश्वासो मृत्योः द्वाराणि चत्वारि ॥ २।१५१ ॥

ततः कृच्छ्रेण स्वामि-वचनात्मा तत्रैव प्रसूता। एतत् सर्वं श्रुत्वा समुद्रेणापि यच् छक्ति-ज्ञानार्थं तद्-अण्डान्य् अवहृतानि। ततष् टिट्टिभी शोकार्ता भर्तारम् आह-नाथ! कष्टम् आपतितम्। तान्य् अण्डानि मे नष्टानि।

टिट्टिभोऽवदत्- प्रिये! मा भैषीः इत्युक्त्वा पक्षिणां मेलकं कृत्वा पक्षि-स्वामिनो गरुडस्य समीपं गतः। तत्र गत्वा सकल-वृत्तान्तं टिट्टिभेन भगवतो गरुडस्य पुरतो निवेदितम्-देव, समुद्रेणाहं स्व-गृहावस्थितो विनापराधनेनैव निगृहीतः।

ततस्तद्वचनम् आकर्ण्य गरुत्मना प्रभुः भगवान् नारायणः सृष्टि-स्थिति-प्रलय-हेतुः विज्ञप्तः। स समुद्रम् अण्ड-दानायादिदेश। ततो भगवद्-आज्ञां मौलौ निधाय समुद्रेण तान्य् अण्डानि टिट्टिभाय समर्पितानि।

अतोऽहं ब्रवीमि- अङ्गाङ्गिभावम् अज्ञात्वा इत्यादि।

राजाह- कथम् असौ ज्ञातव्यो द्रोह-बुद्धिः इति।

दमनको ब्रूते- यदासौ सदर्पः श्रृङ्गाग्र-प्रहरणाभिमुखश्चकितम् इवागच्छति तदा ज्ञास्यति स्वामी। एवम् उक्त्वा सञ्जीवक-समीपं गतः।

## २-०८ पिङ्गलकेन सञ्जीवकवधः

तत्र गतश्च मन्दं मन्दम् उपसर्पन् विस्मितम् इवात्मानम् अदर्शयत्। सञ्जीवकेन सादरम् उक्तम्-भद्र ! कुशलं ते।

दमनको ब्रूते-अनुजीविनां कुतः कुशलम्। यतः-

सम्पत्तयः पराधीनाः सदा चित्तम् अनिर्वृत्तम्।
स्व-जीइवितेऽप्य् अविश्वासस् तेषां ये राज-सेवकाः ॥ २।१५२ ॥

अन्यच्च-

कोऽर्थान् प्राप्य न गर्वितो विषयिणः कस्यापदो ऽस्तं गताः
स्त्रीभिः कस्य न खण्डितं भुवि मनः को वास्ति राज्ञां प्रिया।
कः कालस्य भुजान्तरं न च गतः को ऽर्थी गतो गौरवं
को वा दुर्जन-वागुरासु पतितः क्षेमेण यातः पुमान् ॥ २।१५३ ॥

सञ्जीवकेनोक्तम्-सखे ! ब्रूहि किम् एतत् ?

दमनक आह-किं ब्रवीमि मन्द-भाग्यः। पश्य-

मज्जन्न् अपि पयोराशौ लब्ध्वा सर्पावलम्बनम्।
न मुञ्चति न चादत्ते तथा मुग्धो ऽस्मि सम्प्रति ॥ २।१५४ ॥

यतः-

एकत्र राजविश्वासो नश्यत्य् अन्यत्र बान्धवः।
किं करोमि क्व गच्छामि पतित् ओ दुःख-सागरे ॥ २।१५५ ॥

इत्युक्त्वा दीर्घः निःश्वस्योपविष्टः । सञ्जीवको ब्रूते-मित्र ! तथापि स-विस्तरं मनोगतम् उच्यताम् ।

दमनकः सुनिभृतम् आह-यद्यपि राज-विश्वासो न कथनीयस् तथापि भवान् अस्मदीय-प्रत्ययाद् आगतः । मया परलोकार्थिनावश्यं तव हितम् आख्येयम् । शृणु, अयं स्वामी तवोपरि विकृत-बुद्धी रहस्य् उक्तवान् -सञ्जीवकम् एव हत्वा स्व-परिवारं तर्पयामि ।

एतच् छ्रुत्वा सञ्जीवकः परं विषादम् अगमत् । दमनकः पुनः आह-अलं विषादेन । प्राप्त-कालकायम् अनुष्ठीयताम् । सञ्जीवकः क्षणं विमृश्याह स्व-गतम्-सुष्ठु खल्व् इदम् उच्यते । किं वा दुर्जन-चेष्टितं न वेत्येतद् व्यवहारान् निर्णेतुं न शक्यते । यतः-

दुर्जन-गम्या नार्यः प्रायेणापात्र-भृद् भवति राजा ।
कृपणानुसारि च धनं देवो गिरि-जलधि-वर्षी च ॥ २।१५६ ॥

कश्चिद् आश्रय-सौन्दर्याद् धत्ते शोभाम् असज्जनः ।
प्रमदालोचन-न्यस्तं मलीमसम् इवाञ्जनम् ॥ २।१५७ ॥

आराध्यमानो नृपतिः प्रयत्नान्न तोषम् आयाति किम् अत्र चित्रम् ।
अयं त्व् अपूर्व-प्रतिमा-विशेषो यः सेव्यमानो रिपुताम् उपैति ॥ २।१५८ ॥

तद् अयम् अशक्यर्थः प्रमेयः, यतः-

निमित्तम् उद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारण-द्वेषि मनस् तु यस्य वै
कथं जनस् तं परितोषयिष्यति ॥ २।१५९ ॥

किं मयापकृतं राज्ञः । अथवा निर्निमित्तापकारिणश्च भवन्ति राजानः ।

दमनको ब्रूते-एवम् एतत् । शृणु-

विज्ञैः स्निग्धैः उपकृतम् अपि द्वेष्यताम् एति कैश्चित्
साक्षाद् अन्यैः अपकृतम् अपि प्रीतिम् एवोपयाति ।
चित्रं चित्रं किम् अथ चरितं नैकभावाश्रयाणां
सेवा-धर्मः परम-गहनो योगिनाम् अप्य् अगम्यः ॥ २।१६० ॥

अन्यच्च-

कृत-शतम् असत्सु नष्टं सुभाषित-शतं च नष्टम् अबुधेषु ।
वचन-शतम् अवचन-करे बुद्धि-शतम् अचेतने नष्टम् ॥ २।१६१ ॥

किं च-

चन्दन-तरुषु भुजङ्गा जलेषु कमलानि तत्र च ग्राहाः ।
गुण-घातिनश्च भोगे खला न च सुखान्य् अविघ्नानि ॥ २।१६२ ॥

मूलं भुजङ्गैः कुसुमानि भृङ्गैः
शाखाः प्लवङ्गैः शिखराणि भल्लैः ।
नास्त्ये एव तच्-चन्दन-पादपस्य
यन् नाश्रितं दुष्टतरैश्च हिंस्रैः ॥ २।१६३ ॥

अयं तावत् स्वामी वाचि मधुरो विष-हृदयो ज्ञातः । यतः-

दूराद् उच्छ्रित-पाणिः आर्द्र-नयनः प्रोत्सारितार्धासनो
गाढालिङ्गन-तत्-परः प्रिय-कथा-प्रश्नेषु दत्तादरः ।
अन्तर्भूत-विषो बहिः मधुमयश् चातीव माया-पटुः
को नामायम् अपूर्व-नाटक-विधिः यः शिक्षितो दुर्जनैः ॥ २।१६४ ॥

तथा हि-

पोतो दुस्तर-वारि-राशितरणे दीपो ऽन्धकारागमे
निर्वाते व्यजनं मदान्ध-करिणां दर्पोपशान्त्यै सृणिः ।
इत्थं तद् भुवि नास्ति यस्य विधिना नोपाय-चिन्ता कृता
मन्ये दुर्जन-चित्त-वृत्ति-हरणे धातापि भग्नोद्यमः ॥ २।१६५ ॥

सञ्जीवकः पुनः निःश्वस्य-कष्टं भोः ! कथम् अहं सस्य-भक्षकः सिंहेन निपातयितव्यः ? यतः-

ययोः एव समं वित्तं ययोः एव समं बलम् ।
तयोः विवादो मन्तव्यो नोत्तमाधमयोः क्वचित् ॥ २।१६६ ॥

अयुद्धे हि यदा पश्येन्न काञ्चिद् हितम् आत्मनः ।
युध्यमानस् तदा प्राज्ञो म्रियते रिपुणा सह ॥ २।१७० ॥

अपरं च-

भूम्य्-एक-देशस्य गुणान्वितस्य
भृत्यस्य वा बुद्धिमतः प्रणाशः ।
भृत्य-प्रणाशो मरणं नृपाणां
नष्टापि भूमिः सुलभा न भृत्याः ॥ २।१७७ ॥

दमनको ब्रूते- स्वामिन् ! को ऽयं नूतनो न्यायो यद् अरातिं हत्वा सन्तापः क्रियते ? तथा चोक्तम्-

पिता वा यदि वा भ्राता पुत्री वा यदि वा सुहृत् ।
प्राण-च्छेद-करा राज्ञा हन्तव्या भूतिम् इच्छता ॥ २।१७८ ॥

अपि च-

धर्मार्थ-काम-तत्त्वज्ञो नैकान्त-करुणो भवेत् ।
नहि हस्तस्थम् अप्य् अन्नं क्षमावान् भक्षितुं क्षमः ॥ २।१७९ ॥

किं च-

क्षमा शत्रौ च मित्रे च यतीनाम् एव भूषणम् ।
अपराधिषु सत्त्वेषु नृपाणां सैव दूषणम् ॥ २।१८० ॥

अपरं च-

राज्य-लोभाद् अहङ्काराद् इच्छतः स्वामिनः पदम् ।
प्रायश्चित्तं तु तस्यैकं जीवोत्सर्गो न चापरम् ॥ २।१८१ ॥

अन्यच्च-

राजा घृणी ब्राह्मणः सर्व-भक्षी
स्त्री चावज्ञा दुष्प्रकृतिः सहायः ।
प्रेष्यः प्रतीपो ऽधिकृतः प्रमादी
त्याज्या इमे यश्च कृतं न वेत्ति ॥ २।१८२ ॥

विशेषतश्च-

सत्यानृता च परुषा प्रिय-वादिनी च
हिंस्रा दयालुः अपि चार्थ-परा वदान्या ।
नित्य-व्यया प्रचुर-रत्न-धनागमा च
वाराङ्गनेव नृप-नीतिः अनेक-रूपा ॥ २।१८३ ॥

इति दमनकेन सन्तोषितः पिङ्गलकः स्वां प्रकृतिम् आपन्नः सिंहासने समुपविष्टः । दमनकः प्रहृष्ट-मनाः विजयतां महाराजः शुभम् अस्तु सर्व-जगताम् इत्युक्त्वा यथा-सुखम् अवस्थितः ।

विष्णु-शर्मोवाच-सुहृद्-भेदः श्रुतस् तावद् भवद्भिः ।

राज-पुत्रा ऊचुः-भवत्-प्रसादाच् छ्रुतः । सुखिनो भूता वयम् ।

विष्णुशर्माब्रवीत्-अपरम् अपीदम् अस्तु-

सुहृद्-भेदस्तावद् भवतु भवतां शत्रु-निलये
खलः कालाकृष्टः प्रलयम् उपसर्पत्व् अहः-अहः ।
जनो नित्यं भूयात् सकल-सुख-सम्पत्ति-वसतिः
कथारम्भे रम्ये सततम् इह बालो ऽपि रमताम् ॥ २।१८४ ॥

**इति हितोपदेशे सुहृद्भेदो नाम**

**द्वितीयः कथा-सङ्ग्रहः समाप्तः ।**

## सारांशः

अस्मिन् खण्डे सुहृद्भेदे अबशिष्टाः कथाः प्रतिपाद्यन्ते । तत्र प्रथमतः प्रधानकथायाः प्रसङ्गात् अवान्तरकथारूपेण कर्पूरपटकस्य गर्दभस्य कथा भवति । वाराणस्यां कर्पूरपटको नाम वणिक् आसीत् । तस्य एकः गर्दभोऽपि आसीत् । एकदा रात्रौ कश्चित् तत्र समागतः तदानीं शब्दमकृत्वैव तूष्णीं स्थितः श्वा । तादृशं श्वानं दृष्ट्वा कोपेन गर्दभः स्वकार्यं कुरु इति उपदिदेश । परन्तु मम कार्ये भवतां प्रवेशो मास्तु इति तेन उक्तम् । तच्छ्रुत्वा कोपाविष्टः गर्दभः अधुनैव यजमानमुत्थापयामि इति शब्दं कृतवान् । भग्ननिद्रः यजमानः कोपेन गर्दभं मारितवान् । अतः स्वकार्ये एव मतिः देया न तु अन्यस्मिन् कार्ये इति करटकोऽब्रवीत् ।

एतदनन्तरं प्रभुसेवायाः महत्त्वं करटकसंवादरूपेण महता प्रबन्धेन कृतं वर्तते । ततः दमनकः सिंहस्य समीपं गतवान् । सिंहोऽपि बहुदिनानि जातानि इति उवाच । तच्छ्रुत्वा दमनकः अनेन दासेन भवतां प्रयोजनं नास्ति इति अवदत् । सिंहः किमर्थम् एवं वदसि इति पृष्टे दमनकः अपृच्छत् । भवान् किमर्थं

जलपानानन्तरं मूर्च्छां प्राप्तवान् वद् इति । ततः भवान् सिंहेन उत्तरं कथिते दमनकः वदति मा भैषीः । यावदहं भवामि तावत् भवतां खेदो न भवतीति छलेन उक्त्वा करटकं नीत्वा चलितः । ततः परं तेन मूषकमार्जारसिंहकथा श्राविता । तत्प्रसङ्गात् ब्रह्मपुरस्स्थघण्टाकर्णकथा भवति । तत्समाप्य पुनः प्रधानकथा प्राप्यते । तत्र च केवलवचनात् अज्ञात्वा न भेतव्यमिति नीतिः परिस्फुरति । ततः परं वीरविक्रमस्य कथा भवति, तत्र च दोषः आत्मकृतश्चेदपि परिवेदनमनुचितमिति नीतिः ज्ञायते । अनन्तरं बन्धक्याः कथा । तत्र स्त्रीणां माहात्म्यमुपवर्णितम् । ततः  वायसदम्पत्योः कथा भवति तत्र हि उपायेन यच्छक्यं तदेव शक्यं नतु पराक्रमैः तच्छक्यम् इति । ततः बुद्धिरेव सर्वतो बलवती इति द्योतनाय सिंहकथा आगता । एवमेव अन्ते टिट्टिभदंपती कथा आगच्छति । तत्र सामर्थ्यनिर्णयः अङ्गाङ्गिभावमज्ञात्वा न कर्तव्य इति ज्ञानं संपद्यते । एवं क्रमेण सुहृद्भेदस्य प्रधानकथां समापयति विष्णुशर्मा ।

## बोधप्रश्नाः

1. कर्पूरपटकः कुत्र आसीत्?
2. दुर्दान्तो नाम कः?
3. घण्टाकर्णो नाम राक्षसः कुत्र वस्तीति जनप्रवादः आसीत्?
4. वीरविक्रमः कस्य देशस्य राजा?
5. काष्ठानां कः न तृप्यति?

## शब्दावली

1. कर्पूरपटकः
2. दुर्दान्तः
3. वायसः
4. घण्टाकर्णः
5. विरविक्रमः
6. कृष्णसर्पः
7. टिटिभः

**सन्दर्भग्रन्थः -**

1. हितोपदेशम् – मूलमात्रम्, श्रीलक्ष्मीनारायणमुद्रालयः, बंबई- 1918.

**सहायकग्रन्थाः –**

1. हितोपदेशम् – Commentary by - पण्डित रामेश्वरभट्ट, निर्णयसागरप्रेस, बंबाई- 1941.
2. हितोपदेशम्- Commentary by M.R.Kale, Motilal Banarsi Das,Varanasi,1976.

**बोधप्रश्नोत्तराणि –**

1. वाराणसी
2. अर्बुदशिखरे विद्यमानः सिम्हः
3. श्रीपर्वतमध्ये ब्रह्मपुराख्यनगरे
4. काञ्चनपुरस्य
5. अग्निः

**अभ्यासप्रश्नाः**

1. अस्मिन् खण्डे प्रतिपादिताः सर्वाः नीतयः कण्ठस्थिकर्तव्याः
2. पञ्चकथानां परिचयं कुरुत
3. सुहृद्भेदस्थान् विशेषान् चित्वा प्रबन्धमेकं लिखत

***************